M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 241

Title: Sapta Padartha Tika

241

Incomplete

Sapta Padārtha Tīka		: Title
		: Author
सप्त पदार्थ टीका।		: Editor
		: Year, Vols.
		: Publisher
241		: Remarks

श्रीमन्महामंगलमूर्त्तये नमः ॥ अविघ्नमस्तु ॥ कथमिदं तु भवेदिह वै राजन्मदवविघातविधावुपकारकं ॥ इति
वियेवहरस्यधनुर्द्विधाविरचयन्नवतीद्रघुनंदनः ॥१॥ स्ववश्मदजन्नामोदभ्रमद्भ्रमरसंकुलं। अमानंदनमीडेहं क
रुणालयं ॥२॥ रघुवीरपदांभोजभावनोन्मूलितांहसा। पित्रा नैनिपदांभोजे नून्क्रिणी विष्णुशर्मणा ॥३॥ महर्षी
नप्रपौत्रं शापरिकल्पितमूर्त्तये ॥ गदाधरपितृव्याय गुरवे सततं नमः ॥४॥ विद्वच्चकोरतुष्ट्यै काहिन्योत्तुंगमेघ
जालानि ॥ अविघ्नैषा विशदा विदुषा कृशोन तन्यते यत्नात् ॥५॥ अगुरपिमूमनविषादोदुष्टकृतो स्वभावतः खि
द्यायां ॥ परगुणगणेन व्यग्राः पंडितवर्याः सहस्रशः संति ॥६॥ विघ्नध्वंसार्थं कृतं मंगलं शिष्यशिक्षार्थमनुबं
गतो विशिष्याणां मंगलसंपत्त्यै च ग्रंथादौ निबध्नाति कश्चित्रं स्तितेत्यादि · हरः ईशः नो अस्मान् पातु विघ्नान्निकृं
बात्यात्वित्यर्थः। इष्टदेवतानुस्मृतासती क्षिप्रं कार्यी याललिलितियाद्दाह हं व्यनक्ति · हर्षहेतुमाह सुहृदः पा
र्वत्याः वदनं मुखं आलोक्य · मुखदर्शनमात्रेन हर्षाव्यभिचारि सर्वदा तद्विलोकनादत आह भीतिस्पृशाः
भयवत्याः भयहेतुमाह उरगाकल्पेन · नागरूपभूषणेन मंदस्पंदं मंदगमनं तेन विभिन्नो मुक्तो वंधो बंधनं य
त्र भवति तथा स्पृष्टायाः · मंदस्पंदे बीजमाह मंदस्विनेति · पुष्टेनेत्यर्थः · मंदस्वित्वे हेतुमाह कस्तोत्रं स्तितेति

शेषश्चासौ भूषणभूतश्च शेषफणो भूतः · कर्णस्तोत्रं स्तितो शेषो अग्रभागौ यस्य एवंभूतश्चासौ शेषफणभूषणं तस्य यन्तु
कं तस्य या छटा उत्तः · तस्याः आपीडनमाधानं तेन लीलिंनीक्रुवंती या चंद्रकला तस्याया अनुकंपिकलिकास्तासां
स्पादेन निवारणेत्नीया। षष्ठ्याक्षोत्त्रं स्तितोश्शरं एवं विधं यष्ठेषफणभूषणं च इति विग्रहः · यद्वा द्विघ्नशंकं मंगल
माचरणीयमिति शिष्यशिक्षार्थं मंगलांतरं निबध्नाति · अव्यादिति · ननु हेतवदृष्टाघपर्घ्वनाशेवाद्दित्यजिज्ञैर्नम
स्कारात्मकं मंगलं कृतं तद्युक्तं फलाभावात् · कादंबरीप्रभृत्यनुष्ठितकर्मणोरन्वयव्यतिरेकाभ्यां व्यभिचारादा
वार्याभिमतसमाप्तिफलकत्वायोगात् · अवश्यकल्प्यमाननियतपूर्ववर्त्तिनाकान्मर्शाण्त्रमर्दनादेवसमाप्तिसं
भवेत्तत्सहभूतत्वेन तस्यान्यथासिद्धेश्च विघ्नध्वंसस्य च विनापि मंगलं गंगास्नानादिना पिभावेन व्यतिरेकव्यभिचा
रात्गंगेश्वराभिमतविघ्नध्वंसफलकत्वस्यापि तथाऽसिद्धेः प्रयोगात्नालिविघ्नानुत्पादस्तत्फलमितिपक्षधरमिश्रोक्ति
रः अद्भ्या · अनुत्पादस्य प्रागभावरूपतयाऽसाध्यत्वात् · विघ्नविद्यमानतानिश्चयदशायां मंगलानुष्ठानप्रसंगाच्च
· किंच निबद्धमंगलत्वं समाप्त्यादिहेतुत्वस्य गौरवेणाभावत्त्वान्निर्वंधो व्यर्थः शंभवेन महत्वनेनैव नमस्कारासिद्धे
प्राचीनविशेषणोपादानं च व्यर्थमित्याशंकात्रयमपाकर्तुमवतारयति · चिकीर्षितेति · इदं कृत्स्नं साधयामीति कृति

साध्यत्वप्रकारकेच्छाविषयश्चकीर्तितंकर्मसप्तपदार्थ्याख्यमित्यर्थः· अत्रप्रतिबंधकदुरितनिवृत्त्यर्थमित्यनेना
धाशंकानिराकृता· नचप्रागुक्तव्यतिरेकव्यभिचारान्नमंगलस्यविघ्नध्वंसजनकत्वमितिवाच्यं· एवंहिसतियाग २
स्यस्वर्गप्रतिकारणतानस्यात्‌ गंगास्नानादितोपिस्वर्गसंभवात्‌· यदिचस्वर्गविशेषेतेषांजनकत्वमितिमतंतर्हिम
पिविघ्नध्वंसविशेषेजनकत्वमस्तु· इयानेवविशेषः स्वर्गेजातिरूपेविशेषइहतूपाधिरूपेविघ्नविशेषप्रतियोगि
कत्वादिरूपः· अतएवाध्ययनाशपाकाभ्यांपृथिवीरूपादिनाशःसंगच्छते· नचबहुतरविघ्नसद्भावेकृतमंगलेनक
स्यनाशः· विनिगमनाभावादितिवाच्यं· इक्षुभारमध्येकस्यचिदेववन्हिकणस्येतिवत्तदुपपत्तेः· नचकादंबर्यादौ
मंगलेनविघ्ननाशान्तंत्यमाप्त्यापत्तिः· प्रतिबंधकाभावस्यहेतुत्वादितिवाच्यं· प्रतिबंधकाभावकूटस्यकारण
त्वात्‌· अतएवैकमणिसद्भावेऽपरमणेरभावमादायनदाहः· किंचसामग्रीकार्यनियतानुकारणमात्रमति
प्रसंगात्‌· तथाचतत्कर्तृशरीराद्यभावान्नतत्रसमाप्तिः· नचविघ्नध्वंसेनातिरिक्तकारणाभावोपिशक्यः· तत्किं
प्रतिबंधकाभावःसामग्रीसंपादकः· ॐमितिचेत्‌· न· तथासतिमणेरभावेनसकलदाहहेतुसंपादनेसर्वत्रदा
हप्रसंगात्‌· विस्तरस्त्वत्रग्रंथांतरेऽवसेयः· इष्टदेवनामहेश्वरलक्षणस्यतत्त्वाद्यप्रवर्त्तकत्वात्‌· शिष्यशिक्षा

र्थेइत्यनेनद्वितीयाशंकापरास्ता· नतीति· नतेः प्रधानत्वात्पूर्वभावः· गुणप्रधानभावेनेत्यत्रगुणपदस्याल्पाच्त्वा
त्पूर्वनिपातः· नतिस्फातिरूपमत्यनेनप्राचीनविशेषणत्वेवैयर्थ्यशंकानिरस्ता· शंभवेनमइत्यनेननतिकर्त्तृत्व
इत्यादिनास्फुटत्वमभिधानात्‌· ननुएवंद्वैतवदत्रवाक्यभेदापत्तिः· नतिस्फातिरूपयोर्वाक्यार्थयोर्भिन्नत्वा
त्‌· प्रतिपाद्यभेदेप्रतिपादकभेदस्यावश्यकत्वादतआहगुणप्रधानभावेनेति· नतिस्फात्योर्यौगपद्यतयाप्रधा
नत्वयोरन्वयः· वाक्योक्तिःक्रियार्थः· प्रधानंअन्यस्तुगुणभूतः· तद्विहननतेः क्रियार्थितयाप्राधान्यं· स्फातेर
क्रियार्थितयागुणत्वं· तथाचप्रधानीभूतवाक्यार्थैक्यभेदादेववाक्यभेदोनत्वप्रधानीभूतादपितिस्यात्‌· अ
न्यथाघटंपश्यपैन्यादावपिघटघत्वदर्शनान्वयरूपवाक्यार्थस्यभिन्नत्वेनवाक्यभेदापत्तिः· नचस्फातेगुणत्वे भि
तात्पर्याविषयतयानफलजनकत्वमितिवाच्यं· अनिच्छयापिसंस्पृष्टइत्यादिन्यायेनकार्यकरत्वात्‌· नही
ध्वनोपसर्जनत्वेनबद्धनिवद्धवन्हेर्नदाहजनकतेतिभावः· ननुनतिस्फात्योर्मध्येएकैकस्यैवाभिमत
सिद्धिजनकत्वमस्तिनवा· आद्येकिंसमुच्चयेन· द्वितीयेपिसमर्थसमुच्चयस्याप्यसमर्थत्वात्किंसमुच्चयेनेति
भू चेत्‌· नैवंसाधनभूयस्त्वेफलभूयस्त्वात्‌· तदुक्तमाचार्यैः· प्रचितस्यासैववल्लवत्तरविघ्नवारकत्वात्‌· नहि

घन बिन्दुमुक्तमुदकमेकरव तृणस्तंवा निवारयितुमसमर्थं इतितदर्थं नापोदीयते इति· वदुनांवनुर्थ्यं नतले
नमः पदान्वयश्रमं निवारयितुमाह तत्रेति· ननुसं भवेनम इत्यनेनकथमीश्वरलाभः शं भवतीतिचकृत्य ३
त्वाह्रिय: सुखस्वनूपो भवतीतिसत्न भ्यते· नवेश्वरसुखयोर भेदः नित्यत्वानित्यत्वगुणत्वद्रव्यत्वादि वि
व रुद्धधर्मत्वादतआह शं भवतीति· अंतर्भुतः अन्तर्भितः प्रयोजक व्यापारोयस्यः तथा च शं सुखं भावयती
ति शं भुपदेन सुखकारणं ईश्वरोक्तत्वादीश्वरलाभस्तत्पदा फलं· अत्रशमयत्यर्थान्त्रा एनादुरवः जात
मितिशं शामकः इत्यावत्· शामको भवतीति शं भुः नवेवमंतर्भूतण्यर्थाद्भवते रिति मूलानन्वयः स्यात्·भ
वतेरंतर्भूत ण्यर्थत्वादिति वाच्यं अंतर्भूतण्यर्थाद्यामितिपदात्परोयो भवतिस्तस्मादिति व्यधिकरणे पंचा
म्याश्रयणाद दोषइति केचित्· मितभा विणीकारव्याख्यानमपाकरोति शामिति· माधवो धातुरत्रि
कारो माधवाचार्य इति वक्तव्यत्रि श्वित्त्वेत्याह तत्रहेतुरपादाने डुत्पाभावादित्यर्थः पत्तुमाधवो माधवा श
ख्यसरस्वतीशो भवत्यस्मादिति पंव्युत्पत्तिमाहसा व्युत्पत्तिर्हि त्याकुतः अपादाने डुप्रयाभावादित्यर्थ
इतिः तदध्याहारप्रसंगादुपेक्षणीयं· ननुशं भावर्तीति व्युत्पत्तिपक्षेसुखसाधनं शं भुपदेनोक्तंतथा
प

वसुखप्रागभावादेरपिनमस्कारप्रसंगः शामयतीतिशंशं भवतीति द्वितीयपक्षेदुःखशामकः शं भुपदेनोक्त
स्तथाचदुःखादेरपि प्रतियोगित्वादिनादुःखध्वंससाधनत्वात्तस्यापिनमस्कार्यतापत्तिरतआह साधुत्वेत्यादि·
साधुत्वं प्रकृति प्रत्यययोगेन व्याकरणनिष्पन्नत्वंतस्याख्यानं कथनं· केवलंन परं साधुप्रत्ययः केवलोपि
नेत्यभियुक्तोक्तेः प्रकृति प्रत्यययोगेनैव पदानांसाधुत्व मितिभावः मात्रपदनिरोगात्वादेननायंमहेश्वरलाभाय
उपायइति सूचयति कस्तर्हीं ईश्वरलाभे उपायइत्यत आहसत्येति· रूढिः समुदायशक्तिः· रूढे· स्त्रीलिंगत्वा
द्रियमितिस्त्रीलिंगोक्तिः अतएवेति· यतएवमहेश्वरे शं भुपदस्यरूढिरतएवेत्यर्थः रूढिमेवाविशदयति नहीं
ति· प्रतीयंते· जानंति· यद्वामास्कयोगवलात्कांतादिप्रतीतिः ईश्वरवद्रूढिबलादेवकांतादिप्रतीति शक्ति
त्यतआह नहीति· तथावसटितितत्तस्तदनुपस्थितेनरूढिरित्यर्थइति ध्येयं· गुणप्रधानभावेनेति विस्तृत्य
शंकते किमर्थनर्इति। यदिमहेश्वरेरूढिस्तर्हि हितवइत्यादिप्राचीनविशेषणवैयर्थ्यं शं भुपदादन्यावस
क्तेर्व्यावर्त्याभावादित्यर्थः नत्वन्यव्यावर्त्तकतयाप्राचीनविशेषणसार्थक्याभावेपि ईश्वरनमस्कारोऽयुक्त
स्तसत्वे मानाभावादितितदसिद्धिशंकायां प्रमाणसूचनायलक्षणसूचनायचजगतांहितवइत्युक्तं·

कार्यं हि हेतुना विना स्वात्मानं न लभतानुवृत्तहेतुमन्वयादन्तरहेतुवत्कल्पनीयमप्याक्षिपति कर्तुरपि हेतुविशेषत्वा
दिति प्रमाणज्ञापनात्· अदृष्टाद्वारकक्षित्याद्युपादानगोचरापरोक्षज्ञानचिकीर्षावत्त्वमीश्वरासाधारणका
रणत्वं वा स्वातंत्र्येण सर्वविषयाकर्तृत्वं वा ईश्वरत्वमिति तल्लक्षणज्ञापनाद्वा प्राचीनविशेषणवैयर्थ्यं न स्यादि ४
ति कस्यचित्समाधिमाशंक्य निराकरोति नहीश्वरेति· तदिति· ईश्वरलक्षणप्रमाणोदित्यर्थः· आद्यहेतुमाह
प्रमाणमिति· प्रमाणमित्युपन्यस्तलक्षणोपन्यस्तानुपन्यस्तत्वापि द्रष्टव्यं· अमरेणाविदुषा· पामरे
णमूर्खेण· स्वरूपसदिति· नहि प्रमाणोपन्यासपूर्वकं प्रमेयं न नित्वेन फलातिशयहेतुत्वेनत्वहेतुतावोधकं किं
चिदस्तीत्याशयः· न युज्यते इत्यत्र हेतुमाह तदपेक्षितेति· त्यागेति· मंगलादिति शेषः· स्फुतिनूपामित्यादि पू
र्वं किं स्मारयति उक्तमेवेति जगतामेवेत्येवकारस्य नान्ययोगायोगव्यवच्छेदार्थकतामित्र विभक्त्यंततया
विशेषणाविशेष्यभावायोगात्· क्रियासमभिव्याहाराभावेऽत्यन्तायोगव्यवच्छेदार्थमेव प्रसक्तमत आह एवकार इति· न
न्वत्रैतेन समभिव्याहृतपदार्थतावच्छेदकव्यापकत्वमेव सर्वत्रैवकारार्थ इति वस्यमाणरीत्या प्रकृते पि ज
गत्वस्येश्वरहेतुकत्वव्यापकत्वं लभ्यते तत्र जगत्वस्येश्वरहेतुकत्वाधिकदेशावृत्तेरुपपद्यतएव यथा

धूमवान् वह्निमानेवेत्यत्र धूमत्वावच्छिन्नाभाववद्वृत्तिकस्यापि वह्नेर्व्यापकत्वं न चैतावतेश्वरस्फूर्तिः कृता स्यादत आ
ह एवकार इति· तथा च यथा यावद्धूमाधिकरणतावद्वह्न्यधिकरणमित्यत्र यावत्पदसमभिव्याहृतस्य धूमस्य
व्याप्यकत्वं तावत्पदसमभिव्याहृतेस्य वह्नेर्व्यापकत्वं एवं यावत्तिजगत्वं तावतीश्वरहेतुकत्वमिति जगत्वस्येश्वरहे
तुकत्वव्याप्यत्वलाभात् स्फुटत्वपपत्तिरिति न कश्चिद्दोष इति भावः· अत्र व्यापकत्वशंकस्यैवकारस्य व्याप्यत्वेल
क्षणतोके अव्ययानामनेकार्थकत्वात्कस्यचित्पर्याये व्याप्यत्वेशक्तिरेव· अतएव तच्छक्तिग्राहकमभियुक्त
व्यवहारमाह जगदेवेत्यपरे· ननु एवकारस्य यावदर्थकत्वे कथं तत्रेश्वरहेतुनान्वयः· नित्यस्यापि गगनादेः कृत्स्न
जगदंतःपातित्वादत आह तेनेति· यथा च जगत्पदं जायते इति व्युत्पत्त्या प्रागभावप्रतियोगिजगत्परमिति नो
क्तदोष इति भावः· ननु वकुलशंकुवद्यांवकुवचनादेवानेकार्थोपस्थितेरेवकारवैयर्थ्यमत आहान्यथे
ति· यथा कचित्कलानालभेत्यत्र शीलकपिंजलानामालभे तत्पर्यायवहुवचनस्यांतिपि पर्यायान्तरेण चकृतेपां स्य
ति भावः· अस्मदादीति· तथा च नस्फुटित्वालाभ इति भावः· मिश्रभाविणीकारव्याख्यानं दूषयति· द्वैतवदेवेति
वस्तुत्वद्व्यवहितान्वयत्वादित्यर्थः· दृष्टांतमिषेणान्यव्याख्यां दूषयति· स्फुटेति· अयं वीभयत्रापि हेतुर्द्रष्टव्यः·

ननु संसारेत्यादिना मोक्षहेतुत्वमुच्यते तदयुक्तं तत्र कार्यहितेवइत्यनेनैवोक्तत्वात्पौनरुक्त्यापात्तादत आहसा
मान्यत इति परमपुरुषार्थो मोक्षः अर्णवसाम्यमाह दुर्गमिति चरमावधिश्चरमदुःखं मोक्षार्थिवक्त्रेश्वरमदुः
खार्थित्वस्यैव वर्द्धमानादीलिखनात् भावनिसेतुसाम्यमाहावधिमदिति अत्रावधिमदनवच्छिन्नत्वं चरमत्व वि
शेषणं चरमावधिप्राप्तिसाधनं सेतुरित्येवलक्षणं विवरणप्रयोजनं तु समुद्रमध्यस्थितपुलिनादिप्राप्तिसाध
र ननौकादिव्युदासस्तस्यापि किंचिदपेक्षया चरमत्वात् नयावधिमदनवच्छिन्नपदेनापि कथं तद्व्युदासः तस्या
वधिमता जलेन परिच्छिन्नत्वात् यावावधिमदनवच्छिन्नोयोऽवधिस्तत्प्राप्तिसाधनं सेतुर्नत्वनौकादिस्तथेति ५
वधिमता जलेन परिच्छिन्नत्वात्तथा च ... तेन स्वीयताद्दशशप्राप्तिसाधने हनूमच्छरीरे न सेतुताप्रसंगः सा
भाव: अत्रत्वस्वासमवेतत्वं प्राप्तेर्विशेषणं तेन स्वीयताद्दशप्राप्तिसाधने हनूमच्छरीरेन सेतुताप्रसंगः सा
धनत्वं चासाधारणेन विवक्षणीयं तेन नादृष्टादावतिव्याप्तिः नचैवं गगनत्वव्याप्तिस्तस्य साधारणहेतुत्वा
दितिवाच्यं असाधारण्येनापितस्य हेतुत्वात् नहि साधारणं कारणं कैचिदपि साधारणं तथा सति धर्माधर्म
योः सुखदुःखासाधारणहेतुत्वं नस्यात् तस्यापि परत्वापरत्वासाधारणहेतुत्वं कालादिशोरितिवद्दुर्विज्ञेय
: प्रसज्येत ईश्वरपक्षे त्ववधिमता दुःखसंतानात्मकसंसारेणानवच्छिन्नो यश्चरमावधिश्चरमदुःखं तदर्थं

तदुःखाभावात्तत्प्राप्तिसाधनत्वान्महेश्वरस्य नहि विना तत्त्वज्ञानं चरमदुःखं नश्यति न च तत्त्वमंतरेणा तत्त्व
ज्ञानं नवभगवत्प्रसादं विना एतत्साक्षात्कृत्तिस्तदुक्तं किरणावल्यां स्मर्यते हि कुरणादेनामानुनिर्महेश्व
र नियोगप्रसादावधिगाय शास्त्रं प्रणीनवानिति अक्षपादाकारे विक्षाधर्म्यवैधर्म्य परशास्त्र प्रवर्त्तकायेत्यत्रा
यमर्थः कोऽयं तत्र अवधिमदनवच्छिन्नत्वं चरमावधिप्राप्तिसाधनाविशेषणं प्रयोजनं च नौकादिव्यावृत्तिरेवं नौका
देरवधिमतारज्वादिनाऽवच्छिन्नत्वान्निप्रस्यत्वादित्यर्थ इत्याहुः तत्त्वचरमपदवैयर्थ्यापत्तेः न च मध्यमादिपुलिन
प्राप्तिसाधननौकादिव्यावृत्तये चरमत्वमवधेर्विशेषणमिति वाच्यं अवधिमदनवच्छिन्नपदेनैव तद्वारणात् म
ध्यमादिपुलिनभागस्यापि किंचिदपेक्षया चरमत्वात्तेन तद्व्यावृत्तेरयोगाच्च न च सर्वावध्यपेक्षया चरमत्वं विव
क्षितमिति वाच्यं अर्णवतादृशावधिप्राप्तिसाधनतायां नौकादौ प्रसंगात्तद्विशेषणवैयर्थ्यापत्तेः अन्ये तु
न अवधिमता दंडादिनाऽनवच्छिन्नः अपरिच्छेद्यो गाधलाकस्तस्य यश्चरमावधिस्तत्प्राप्तिसाधनमित्यर्थ इत्याहुः
पूर्वपक्षेन स्वतंत्र सेतुसादृश्यमात्रं लक्षणमिति तत्पदप्रयोजनगवेषणायां न मनः खेदयितव्यमिति रहस्यं पूर्व
न वस्तु नस्त्वत सेतुसादृश्यमात्रं लक्षणमिति पदप्रयोजनगवेषणायां न मनः खेदयितव्यमिति मोक्षसाधनतायामे
न विशेषणेनैव सकलहेतुत्वसिद्धेः सर्वविद्यानामित्याद्यासमर्थक्यप्रसंगादांहतत्रैवेति मोक्षसाधनतायामे

त्वर्थः॰ कर्मधारयापेक्षया दुर्बलमपि षष्ठीतत्पुरुषमुत्तरग्रंथोपयोगितयाहः सर्वेषामिति॰ साधर्म्येति॰ कणादशास्त्रप्र
वर्त्तकायेत्यर्थः तस्यैव साधर्म्यवैधर्म्यप्रदर्शकत्वादिति भावः कणादादिदिसाम्यं व्यवच्छितन्निपरेति॰ ननु प्रमितिविष
याः पदार्था इति पदार्थपदप्रवृत्तिनिमित्तयोर्विवायदार्थसामान्यलक्षणत्वेधयोक्तं नाघः अनाकांक्षितत्वा
६ ग्र त्ल्लाघवान्नपि विषयत्वस्यैतत्प्रवृत्तिनिमित्तत्वाच्च॰ नन्वेवं भ्रमविषयोपि पदार्थः स्यादिति चेत्॰ इष्टापत्तेः कस्त ६
र्हि धर्मभ्रमयोर्विशेषः उभयोरपि पदार्थविषयत्वादिति चेत् विशेष्यनिष्ठात्यंताभावप्रतियोगिकारकत्वतादृशा
त्यंताभावाप्रतियोगिप्रकारकत्वाभ्यामेव विशेषात् नद्योतिः केवलव्यतिरेकीत्यादिवक्ष्यमाणलक्षणलक्षणा
त्यंताभावाप्रतियोगिप्रकारकत्वाभ्यामेव विशेषात् ... कथमयुक्तोयं ग्रंथ इत्यत आह कपुनरिति॰ षष्ठ्या घटिताः समास्तः
प व्याप्यान्तैः भ्रमेयत्वस्य केवलान्वयित्वात्तथा चापमयुक्तोयं ग्रंथ इत्यत आह एतेषामिति उद्देशश्चलक्षणविशेषपद
४ निरे ननु प्रमितिविषयारत्यनेन कथं द्वितीयादिरीकां [illegible] रासोंतत्राह एतेषामिति उद्देशश्च लक्षणं विशेषपद
मुभाभ्यां संबंध्यते॰ तथा च सामान्यत उद्देशः न च तमंतरेण द्रव्यादिपदार्थलक्षणप्रणयनमिति सामान्यत उद्देशश्चावश्य
उद्देशं विना न विशेषत उद्देशः न च तमंतरेण द्रव्यादिपदार्थलक्षणप्रणयनमिति सामान्यत उद्देशं विना
कदति भावः लक्षणेति॰ दृष्टांतार्थं यथा सामान्यलक्षणं विना विशेषलक्षणं नास्ति तथा सामान्योद्देशं विना

न विशेषोद्देश इत्यर्थ इत्यन्ये॰ ननु तर्हि पदार्थ इत्येवोत्तरं वाच्यं॰ तावतैव पृथगाशंकाया निवृत्तेरत आह इदमेतेषां
ति॰ धर्म्यंशः प्रदानार्थः क्वचित्तथैव पाठः कस्चिद्काकीवरनीति षष्ठेसूत्रे स्काकीवरतीत्यादा वित्यर्थः अन्यथा
नत्रापि विषयत्वस्थानं स्यादिति भावः ननु कथमयं धर्म्यंशानुवादः उक्तस्य पुनर्वचनं ह्यनुवादः नहि प्रमिति
विषयत्वं प्रागुक्तं किंतु विद्या विषयत्वमत आह प्र[illegible]मितीति अत्र सामान्यत उद्देशावन्सामान्यतोलक्षणमपि
विशेषलक्षणप्रयोगीति पदार्थपदं सामान्यत उद्देशः प्रमितिविषयत्वं च सामान्यलक्षणमिति केचित्तन्न
विशेषलक्षणप्रयोगीति पदार्थपदं सामान्यतउद्देशः ... पुरुषदोषमुक्त्वा वस्तुदोषमाह वक्ष्यमाणेति॰ या
तं दूषयति उद्देशेति तथा चाप्राप्तकालत्वं स्यादिति भावः पुरुषदोषमुक्त्वा वस्तुदोषमाह वक्ष्यमाणेति
वादिदानीयंतो कांक्षितत्वादित्यनेन प्रमिति विषयत्वस्य लक्षणांगीकारत्वभ्रमं निराधारयति॰ वक्ष्यमाणेति
वक्ष्यमाणं पलक्षणलक्षणं तेन सह विरोधाद्व्याप्त्यापत्तेरिति भावः ननु प्रमितिविषयत्वस्य पदार्थसामान्य
लक्षणत्वाभावेन वाप्फन्नरग्रंथविरोध इत्यत आह तत्रैवेति॰ तत्रैवेति॰ तद्ग्रंथव्याख्यानावसरे एव पदार्थसा
मान्यलक्षणं विनापि पदार्थविशेषलक्षणं तत्र तत्राभियुक्तैः कृतमिति मयापि सामान्यलक्षणमनभिधा न्य
येव विशेषलक्षणमुच्यत इति सामान्यलक्षणानभिधाने विशेषलक्षणाभिधानं न दूषणमिति प्रकारेणैव

शार्ङ्गधरभट्टाचार्यास्तु प्रामिति विषयत्वं पदार्थसामान्यलक्षणमेवलक्षणं वाद्विविधं व्यावर्त्तकमुपरंजकं च व्यतिरेकी
धर्मो व्यावर्त्तकं केवलान्वयी तूपरंजकं वक्ष्यमाणलक्षणलक्षणं च व्यावर्त्तकस्यैव व्यावर्त्तकोपरंजकल
क्षणसामान्यलक्षणं तु धर्मत्वमेवेत्यत आह तत्र पदार्थसामान्यलक्षणं कृतमेवेति व्याचक्षते तन्मतमाहान्ये त्वि
ति एतदिति पदार्थलक्षणं कृतमेवेत्यत्रत्येयानुरोधेनेत्यर्थः सामान्यतः इति सामान्यलक्षणविशेषलक्षणसाधा
रणेनेत्यर्थः ननु उद्देशावसरे प्राग्लक्षणमेव पदार्थसामान्यलक्षणमस्त्वित्यत आह अपि चेति स्वोपरक्तेति स्ववि
शिष्टबुद्धिजनकत्वमित्यर्थः व्यतिरेकिणः इति व्यतिरेकि यल्लक्षणं धवलत्वं तस्यापि पृथिवीधर्मतया जं धवली पृथिवी
ति स्वविशिष्टबुद्धिजनकत यावत्स्यापि उपरंजकत्वं स्यादित्यर्थः स्वोपरक्तधीजनकत्वमित्यत्र दूषणान्तरमाह सा
मान्यलक्षणेति धर्मत्वरूपसामान्यलक्षणसमानपतस्य स्वोपरक्तधीजनकत्वस्योपरंजकत्वलक्षणत्वायोगादित्यर्थ
ः सामान्यविशेषभावायोगादिति भावः यद्वाऽभेदेऽपि समानदेशत्वमहत्त्वेवेत्युभयसाधारणं दोषमाह सामान्यल
क्षणेति ननु केवलान्वयित्वमेवोपरंजकत्वं न त्वेवं व्यावर्त्तकवृत्तितथा सति व्यावर्त्तकत्वायोगादत आह केवलेति
नत्वे उपरंजकत्वे पुरुषोत्तममिश्रमतमाह। कश्चित्त्विति अयमाशयः लक्षणेन हीतरभेदानुमितिः तथा यो

वगुणवत्वादिनाऽभिधास्यमानेन द्रव्यादिकं पक्षीकृत्य तत्त्वेतरभेदः साधनीयः तत्र च द्रव्यत्वं यदि केवलान्वयी
निरूपणवत्वादिनाऽभिधास्यमानेन द्रव्यत्वावच्छेदकमेव नेतित्तदवच्छेदेनेतरभेदानुमितिर्न स्यादिति द्रव्यत्वं केवलान्वयिपदा
तिसातंतदाऽतिप्रसक्ततया तदवच्छेदकमेव नेति तदवच्छेदेनेतरभेदानुमितिर्न स्यादिति द्रव्यत्वं केवलान्वयिपदा
र्थत्वादि भिन्नमिति ज्ञातव्यं न च पदार्थत्वेऽद्व्यत्वादिभिन्नत्वज्ञानं विना तत्संभवतीति प्रिख्यापयिषयेत्यंतं पदार्थ
त्व विशिष्यकेतरभेदानुमितिफलयोगिलक्षणमाहेत्यनेन संबध्यते तथा चैतदनभिधाने लक्षणमितरभेद
साधने क्षमं न स्यादिति तत्प्रकरणमयुक्तमेव स्यादिति भावः एतदेव विशदयति द्रव्यादीनामिति ननु प्रामिति
विषयाः पदार्था इति मूले पदार्थपदस्य पदार्थत्वादिरूपपक्षतावच्छेदकाक्रान्ततया पक्षत्वार्थं दभिमतानुमाना सि
द्धेः किं च पदार्थइतरेभ्यो भिद्यते इति न संभवति पदार्थातिरिक्तस्याप्रसिद्धत्वादित्यत आह लक्ष्यतावच्छेदकं चे
ति यद्वा ननु पदार्थमितरेभ्यो भिद्यत इत्यत्र पदार्थत्वत्वं न पक्षतावच्छेदकं प्रमेयत्वादिकेवलान्वयिधर्माणां पक्ष
तावच्छेदकानांक्रान्ततयाऽपक्षत्वापत्तेरत्र द्रव्यत्वादिव्यावृत्त्यसिद्धेः न च पदार्थत्वादित्वं पक्षतावच्छेदकं प्रमेय
त्व मिति वाच्यं आदित्वस्याननुगतस्यैकस्याभावात्तथा चाननुगतपक्षतावच्छेदकाभावात्कथमनुमानमत आह ल
क्ष्यतावच्छेदकं चेति तथा च यदेव लक्ष्यतावच्छेदकं तदेव पक्षतावच्छेदकं केवलान्वयित्वं च तस्येति न पक्षतावच्छेद

सटी॰ प॰ टी॰

दं कत्व) कान्निरुक्तिः कश्चित्पक्षतावच्छेदकं वात्रकेवलान्वयिधर्मत्वमिति पाठः स च स्पष्ट एव॰ ननु केवलान्वयिनो धर्मा
व्यतिरेकिणो भिद्यंते प्रमितिविषयत्वादित्यनुमानं वक्तव्यं तच्च न संभवति द्रव्यत्वादौ व्यतिरेकिधर्मे व्यभिचारादत
आह द्रव्यादीति॰ आदिपदादितरषट्पदार्थपरिग्रहः अत्र द्रव्यत्वादौ व्यभिचारवारणाय कूटस्थं पदं तस्य विगु
णघटान्योन्याभावसमानाधिकरणत्वात् कूटपदोपादाने च न दोषः द्रव्यत्वस्य द्रव्यान्योन्याभावासमानाधिकरणत्वा ४
त्॰ न च द्रव्यत्वस्यापि घटादिप्रतियोगिकान्योन्याभावसमानाधिकरणतया कथं व्यभिचारवारणमिति वाच्यं द्रव्यत्वा
त्॰ न च द्रव्यत्वं स्वावच्छिन्नान्योन्याभावसमानाधिकरणं प्रति
घटावच्छिन्नान्योन्याभावकूटसमानाधिकरणत्वादित्यर्थात्॰ न च द्रव्यत्वं स्वावच्छिन्नान्योन्याभावसमानाधिकरणं प्रति
योगितावच्छेदकेन सहतस्याविरोधादिति अत्रेदं विचार्यते॰ एवमपि द्रव्यगुणान्यतरत्वे कथं न व्यभिचारः
नस्यापि द्रव्यगुणावच्छेदेन द्रव्यत्वावच्छिन्नान्योन्याभावकूटसमानाधिकरणत्वात्॰ तस्यापि व्यतिरेकित्वात्
नच्छेदाभावात्॰ न च तत्समानाधिकरणजातित्वादिविशेषणीयमिति वाच्यं द्रव्यादित्रितयवृत्तिसत्तायां व्य
भिचारात्॰ प्रमेयत्वादेरुपाधितया स्वरूपासिद्ध्यापत्तेश्च॰ परंपरासंबद्धजातेरेवोपाधितया प्रमेयत्वादौ स्व
रूपासिद्धरूप्यारेर्जातिपदविवक्षायामप्युक्तोपाधौ व्यभिचारतादवस्थ्यं॰ अप्रत्येकभिन्नाधिकरणद्रव्यत्वा

घटावच्छिन्नान्योन्याभावकूटसामानाधिकरण्यं हेतुः द्रव्यगुणान्यतरत्वे च भिन्नाभिन्नाधिकरणेन सामानाधिकरण्यमिति
न व्यभिचार इति चेत्॰ मैवं॰ स्वरूपासिद्ध्यापत्तेः नहि प्रमेयत्वादावप्येकाभिन्नाधिकरणे सकलान्योन्याभावसामाना
धिकरण्यमेवेति॰ अत्र प्रतिभाति॰ द्रव्यादिपदं व्यतिरेकिधर्मपरं तथा च व्यतिरेकिधर्मावच्छिन्नयावदन्योन्याभाव
सामानाधिकरण्यत्वादिति फलितार्थः उक्तोपाधौ तु न द्रव्यगुणान्यतरत्वावच्छिन्नान्योन्याभावसामानाधिकरण्यमि
ति न व्यभिचारः न वा स्वरूपासिद्धिः वस्तुतस्तु॰ द्रव्यादिपदं संपातायातं अन्योन्याभावकूटसमानाधिकरणत्वा
दित्येव विवक्षितं उक्तोपाधावच्छिन्नान्योन्याभावस्यापि यावदंतःपातितया न सामानाधिकरण्यस्य तत्राभावादिति
तत्वं॰ ननु केवलान्वयिधर्मत्वादित्येव हेतुरस्तु तावता घटत्वादौ व्यभिचारवारणसंभवादलमपदार्थविपक्षया
गौरवग्रस्तहेत्वपत आह इतिनेति॰ इदं च व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति मते नोक्तं॰ न त्वेवं पृथिवीतरे ५
भ्यो भिद्यत इत्याद्यनुमानस्य का गतिः न च पृथिवी जलादिभिन्ना इत्यादि विशिष्यैव तदनुमानमिति वाच्यं गंधव
त्त्वस्य जलत्वनिष्ठात्यंताभावप्रतियोगित्वज्ञानं विना तेनापि कथं पृथिव्यां जलादिभेदः साधनीयः न च जलं गंधा
त्यंताभाववत्॰ पृथिवी भिन्नत्वादिति तज्ज्ञानमिति वाच्यं तथा सत्यन्योन्याश्रयापत्तेः न च शाखागुरुवचनाभ्यां

गंधस्य जलावृत्तित्वज्ञानानंतरं पृथिवी जलाद्भिद्यते गंधवत्वादित्यनुमानोपपत्तिरिति वाच्यं प्रकृतेपि समानत्वादित्य
नुशयादाह विवेचितेति तद्भिन्नतया· केवलान्वयिधर्मभिन्नतया तेषां· द्रव्यत्वादीनां· आदिनेति· स्वावच्छिन्नप्रसक्ता व्यावर्त्तक
त्वान्यथानुपपत्ति(सिद्धिः स्यान्न स्वैकेनैव) नूपपेत्यर्थः ननु गुणत्वत्वादिभिर्गुणत्वादिबुद्ध्यत्वादिव्यावृत्तिसिद्धौ द्रव्यत्वत्वा
हिभिन्नत्वदसाधारणधर्मैर्द्रव्यत्वादीनां गुणत्वादिव्यावृत्तिसिद्धिः स्यान्न स्वैकेनैव प्रकारेण सर्वत्रेतरभेदसिद्धिरित्याह द्रव्ये
जमस्तीत्यस्वरसादाह त्वेकेति· तथाच पदार्थत्वविशेष्यकेतत्र भेदानुमित्युपयोगिलक्षणमाहेति त्वद्वयेन आघात
इतिभावः प्रथमस्य· किंनामानइतिप्रश्नस्य· उत्तरं· प्रत्युत्तरं· उत्तरं आख्यातत्वेन न संभवे इति पदं· उत्तरस्य· कियंतश्चे
तिद्वितीयप्रश्नस्य· उत्तरस्य प्रतिवचनस्य विनियोगोन्वयस्तत्र हेतुमाह लिंगादिति सामर्थ्यादित्यर्थः तदुक्तं सामर्थ्यं
सर्वभावानां लिंगमित्यभिधीयतइति· यथा स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीत्यवदानसाधनत्वेन स्रु
वादीनि विहितानि तत्रावदानं त्वच्या लोमान्यादीनां काष्ठानां च मांसादीनां पुरोडाशादीनां चास्ति तत्र किमविशे
षेण सर्वावदानसाधनत्वं सर्वस्य विधीयते पृथग्वा सामर्थ्याद्वा· तथांजलिना सक्तून् जुहुयादिति श्रूयते· तत्रापि यथादेव
तार्थनाया मिवकरसंयोगमात्रं होमे साधनत्वेन विधीयते· उत सामर्थ्यात् सूर्पादिदानादाविव व्यापकोंशो वेति
संदेहे आद्योदाहरणे विशेषाश्रवणादनियमः द्वितीये व्यापकोंशपरत्वेंजलिशब्दस्य संकोचो लक्षणा वा स्यादि

त्यनियमइति पूर्वपक्षे आप्ते समाहितं अशक्यार्थविध्यसंभवादवश्यं विधायकस्य शक्तिः सहकारिणी अन्यथा
गगनभक्षणं कुर्यादित्यपि स्यात् तस्माच्छक्तिसहकृतो विधिरेव तत्र समर्थं विधेयं व्यवस्थापयति· नहि स्रुवस्य
मांसावदाने सामर्थ्यं न वा स्वधितेर्घृतावदानसामर्थ्यं· एवं करसंयोगमात्रेण सक्तुग्रहणासंभवाद्व्यापकोंशस्याश्री
यते संकोचलक्षणयोश्च प्रामाणिकत्वाद्दोषस्तथा च प्रकृते प्रकृतेतरसंबंध इति भावः तत्वाख्याते नैव द्वितीयप्र
श्नस्याप्युत्तरं भासप्तेवेति व्यर्थमत आह विभागेति· चिंत्यत इति· विचार्यत इत्यर्थः ननु किमेवकारार्थविचारेण
ष्टमपदार्थनिषेधस्यैव तदर्थत्वसंभवादत आह स्वेति· प्रतियोगीति· अष्टमपदार्थस्येत्यर्थः न च तत्प्रसिद्धिरनंगी
सद्भावाभावेन निरूप्यत इति वाच्यं ननु तदसंभवेपि पदार्थाः सप्तैव न षण्नवाष्टौ वेति संख्याव्यवच्छेदस्तदर्थो
स्तु न वा तत्र सिद्धिरिति दिक्मत आह नापीति· आद्यहेतुमाह उत्तरोत्तरेति· व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्य
कत्वादिति भावः अन्यत्रापेक्षाबुद्धिविशेषेणाद्वित्वमनुत्पाद्यैव त्रित्वमुत्पादितं तत्र कथं व्यापकत्वमिति कश्चि
त्· तत्र· एकत्वत्रयगोचरापेक्षाबुद्धिस्त्रित्वोत्पादिका सैवैकत्वद्वयगोचरत्वाद्द्वित्वोत्पादिकापि कथं न स्यात्·
न्वेकत्वद्वयमात्रगोचरापेक्षाबुद्धित्वेन द्वित्वोत्पादकता· गौरवात्· अतएव संभवप्रमाणस्थले सहस्रेण शतानु

मानमितिध्येयं · द्वितीयेहेतुमाहाघ्रादित्वस्येति · अत्रोघटाः नवद्रव्यात्वाद्यत्यस्य सिद्धत्वादित्यर्थः · शंखः पां=
डुरएवेत्यत्रशंखेपांडुरत्वायोगव्यवच्छेदवत्पदार्थाः सप्तैवेति विशेषणीभूतसंख्यान्वयेपदार्थेषुसप्तत्वायोगव्य-
वच्छेदः पार्थएवधनुर्धरइत्यत्रपार्थान्यस्मिन् धनुर्धरत्वयोगव्यवच्छेदवत्सप्तैवपदार्थइति विशेष्यीभूतसं १०
ख्यान्वयेसप्तान्यस्मिन् पदार्थत्वयोगव्यवच्छेदोबाधिततदर्थइत्याह नाद्यविति · स्वीकारेणेति · व्याप्यत्वव्यापका
वरूपंभावाद्दितिभावः सप्तान्यतमेति · सप्तसुद्रव्यत्वादिषुपदार्थेषुस्वीकारादित्यर्थः । अप्रसिद्ध्या · निषेधे
विभाजकेषु मध्येऽन्यतमस्यापाधेरयोगस्यव्यवच्छेदः अत्रवचनपरवादिनदृष्टापत्ति · द्रव्यत्वादेः सप्तपदार्थवि
भाजकोपाध्यभाववद्दृष्टमपदार्थस्यस्वीकारादित्यर्थः अप्रसिद्ध्या · निषेधयितुर्वैशेषिकस्येतिशेषः प्रतियोगि
ज्ञानेनाभावज्ञानसमानाधिकरणमेवकारार्थं अन्यथातिप्रसंगात् · तेननतत्रतत्प्रसिद्धिमादायनिषेधोपप
त्तिरित्येवंकेतिध्येयं · पूर्वेति विशेषणीभूतसंख्यान्वयपक्षेयोर्थस्तदनुपपत्तिरित्यर्थः विशेष्यीकृतसंख्यान्वयपक्षे
सप्तघटान्यस्मिन्नद्यमघटपदार्थत्वस्याविद्यमानतयान्ययोगव्यवच्छेदस्ययथाश्रुतस्यवक्तुमशक्यत्वात्
सप्तान्यतमोपाधिमदन्यस्मिन्पदार्थत्वयोगव्यवच्छेदस्तदर्थोवाच्यः सवनसंभवतीत्याहसप्तेति · अधिक

८१

रणबुद्धेरभावज्ञाननश्यत्वादिकरणप्रसिद्धौतद्योगादितिभावः एवमिति · सप्तपदार्थाएवेति विशेषणी
भूतपदार्थान्वयपक्षे सप्तसुपदार्थत्वायोगव्यवच्छेदः पदार्थाएवसप्तेति विशेष्यीभूतपदार्थान्वयस्याप्रसि
द्धपक्षेपदार्थान्यस्मिन् सप्तत्वयोगव्यवच्छेदश्चतत्तदर्थः पदार्थत्वायोगरूपांशस्तुयोजितोऽप्रसिद्धित्वादाबाधा
थानुपपत्तेः पदार्थान्यस्योऽप्रसिद्ध्याबाधिकरणज्ञानोद्वितीयस्याप्यनुपपत्तेरित्यर्थः तथापीति · समभिव्याहृत
त्वहंसौ सहोच्चारितंयत्पदार्थतावच्छेदकंपांडुरत्वादितन्निरूपितव्याप्यत्वमित्यर्थोनतुतन्निष्ठंव्याप्यत्वमसंभ
वात् · नहियत्रपांडुरत्वंतत्रशंखत्वंश्वेतोत्पलादौव्यभिचारात् · शंखत्वंतुनपांडुरत्वंव्यभिचरतीति · ननुपार्थ
एवधनुर्धरइत्यादौकथंधनुर्धरत्वंपार्थत्वव्याप्यंयनान्येत्राविधनुर्धरत्वदर्शनादितिचेत् · मैवं · उत्कृष्टधनु
र्धरत्वे धनुर्धरपदस्यनिरूढलक्षणयाविद्यमानत्वात् उक्तवाक्यात्सर्वत्रतथाप्रतीतेः ननुव्याप्यत्वस्यैवकारार्थ
त्वेव्यवहितान्वयप्रसंगइत्यत आहप्रतीयमानेतिकेचित् · अन्येतुसमभिव्याहृतपदार्थतावच्छेदकव्याप्यत्वंनामतद
त्यंताभावासामानाधिकरण्यंतच्चनसंभवतिप्रमेयमभिधेयमेवेत्यादावसंगत्यापत्तेः पदार्थविवये चेत्याद्यग्रिमग्रं
थासंगत्यापत्तेश्चपदार्थत्वस्यकेवलान्वयिनयातदत्यंताभावाप्रसिद्ध्या सप्तान्यतमोपाधिमत्त्वस्यतदसामानाधिकर

सटीप

र्णायोगादत आह प्रतीयमानेतीत्यादुः अत्रोभयत्रापि मात्रपदस्य प्रतियोगिन इत्यंतस्य सार्थक्यं किमस्तीति न विद्यः।। टी

वयं तु ननु व्याप्यत्वमव्यभिचरितसामानाधिकरण्यं तत्र च सामानाधिकरण्ये स्पर्शं खः पांडुर इत्यादौ चकारासमभिव्या

हृतस्थले इव वाक्यार्थविधयापि भानसंभवान्न तस्य शाब्दत्वं अन्यत्वभ्यस्य शाब्दार्थतयेत्यस्वरसादाह प्रतीयमानेति वा

क्यार्थविधया प्रतीयमानं पदितरपदार्थतावच्छेदकनिष्ठसमानाधिकरण्ये तत्प्रतियोगिनस्तन्निरूपकस्य पांडुरत्वादेः स ११

हाघ्रातितपदार्थतावच्छेदकस्य तेन प्रतीयमानेतरपदार्थतावच्छेदकेन शंखत्वा[illegible]ना समानाधिकरणो योत्यंताभावस्त

त्प्रतियोगित्वमित्यर्थः मात्रपदेनोभयसामानाधिकरण्यव्यवच्छेदः तथा चात्यंताभावप्रतियोगित्वं वाच्यं अत्यंताभावस्य चेतरप

दार्थतावच्छेदकेन सह सामानाधिकरण्यं संसर्गविधया भासते ननु तत्रापि शक्तिः न वा प्रतियोगितावच्छेदकयोः सामाना

धिकरण्ये शक्तिः अत्यंताभावे च प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं विशेषणं तेन द्रव्यं संयोगवद्वेत्यत्र नासं

गतिरिति ध्येयं अत्र केचित् पांडुरत्वं शंखत्वसमानाधिकरणात्यंताभावाप्रतियोगीति कथं ततो बोधः पांडुरत्वत्वशं

खत्वत्वयोर्व्यापकताव्याप्यतावच्छेदकयोरनुपस्थितेः स्वयं पांडुरपदस्य पांडुरत्वप्रवृत्तिनिमित्तलक्षणया विशेषणतावच्छेद

कपांडुरत्वत्वस्यास्त्वेवोपस्थितिरिति वाच्यं तावतापि शंखत्वत्वोपस्थितेरसमर्थनात् पार्थ एव धनुर्धर इत्यादौ तु

स्त्या

नैकत्वाप्युपस्थितिः अन्यविशेषणतयोपस्थितत्वेन तद्विशेष्यकबोधायोगात् अन्यथा जो नित्यद्रव्यादि योग्यं न स्या

त् न च शंखत्वत्वलक्षणा पार्थधनुर्धरपदयोश्च पार्थत्वधनुर्धरत्वयोर्लक्षणेति वाच्यं तथा सति सामानाधिकरण्यानुपप

त्तेः एकार्थनिष्ठत्वाभावात् तावतापि पदार्थतावच्छेदकव्यापकत्वानिर्वाहाच्च किं च चैत्रस्यैवेदं धनमित्यत्र कथं व्यापक

ता न च स्वत्वसंबंधेन यत्र धनं तत्र चैत्रत्वमिति वाच्यं व्यापकतावच्छेदकस्य चैत्रत्वत्वादेरनुपस्थितत्वात् नाप्येतद्धनत्वं

यत्र तत्र चैत्रस्वत्वमिति व्यापकता व्याप्यतावच्छेदकधनत्वत्वादेरनुपस्थितत्वात् समभिव्याहृतपदार्थतावच्छेदकव्या

पकत्वमित्यादि विरोधात् चैत्रमैत्रोभयस्वामिकेपि चैत्रस्यैवेदं धनमिति प्रयोगप्रसंगाच्च तस्मात्सर्वत्रान्ययोगव्यव

च्छेद एवैवकारार्थः तत्र च नानुपपत्तिः तथाहि शंखः पांडुर एवेत्यत्र पांडुरान्यस्मिन् शंखत्वयोगि नास्ति एवं पार्था

न न्यस्मिन् धनुर्धरत्वयोगो नास्ति इति हि तद्वाक्यात्प्रतीयते तत्र च योगः प्रतीयोगी शंखत्वं तत्प्रतियोगितावच्छेदकमि

ति प्रतियोगितावच्छेदकप्रकारकप्रतियोग्युपस्थितेः सत्त्वमस्त्येव यद्वा पांडुरान्यस्मिन् शंखयोगः शंखाभेदो नेति

तदर्थः अत्र च पांडुरत्वपूर्वं विशेषणतावच्छेदकं तत्प्रकारकपांडुरत्वप्रतियोग्युपस्थितिः शब्दादेव तदन्यस्मिन् शं

खाभेदो व्यवच्छिद्यते तत्रापि शंखत्वप्रकारकशंखोपस्थितेः सत्वान्नानुपपत्तिः एवं चैत्रस्यैवेदं धनमित्यत्रापि

चैत्रान्यस्मिन्स्वत्वसंबंधेन धनाभाव एव एवकारार्थः चैत्रमैत्रोभयस्वामिकधने तु नेतु चैत्रान्यस्मिन् मैत्रेपि स्व-
त्वसंबंधेन धनस्य विद्यमानतया चैत्रस्यैवेदं धनमिति प्रयोगप्रसंगः अतएव धूमवान् वह्निमानेव वह्निमानेव धू-
मवानित्यत्र वह्निमद्भिन्ने धूमवद्भेद एवैवकारार्थः ननु धूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वं १२
वह्नित्वे बोध्यते अनवच्छेदकत्वं चावच्छेदकभिन्नत्वं अवच्छेदकात्यंताभावो वा नोभयमपि वह्नित्वे बोधयितुं शक्यं
नेत्राधिकरणतावच्छेदकवह्नित्वोपस्थितिं विना तदुभयाभावज्ञानासंभवात् स्वातंत्र्येणानुपस्थितत्वेन
वह्नित्वस्याभावाधिकरणत्वेनान्वयासंभवाच्च किंच महानसीयधूमसमानाधिकरणपर्वतीयवह्न्यत्यंताभा-
वप्रतियोगितावच्छेदकपर्वतीयवह्नित्वाद्वह्नित्वस्य भिन्नत्वाभावादनवच्छेदकत्वानुपपत्तेः अन्योन्याभाव
स्य स्य व्याप्यवृत्तित्वादिति प्रतियोगितावच्छेदकत्वपर्यायस्याधिकरणत्वात्यंताभावो वह्नित्वे पर्यवस्यति तत्राधिका-
त्व धिकरणतावच्छेदकवह्नित्वेन रूपेण वह्नित्वोपस्थितिसत्त्वे त्वमिति कथं तद्बोधः अस्मन्मते तु नायं दोषसमूहः
वह्निमद्भिन्नवृत्तित्वेन वह्नित्वावच्छिन्नप्रतियोगितावच्छेदकताकवद्भावच्छिन्नप्रतियोगिताकवह्निमद्भेदवत्त्वस्या-
भिधारणाय वकार्थं तत्र च वद्भेदः प्रतियोगितावच्छेदकत्वं वह्नित्वेन रूपेण वह्नित्वेन प्रतियोगितावच्छेदकतावच्छेदका

त्वं तत्र स्वरूपसंबंधरूपतया स्वरूपेणैव एवकारसमभिव्याहारबलाद्भासते घटोनेत्यत्र घटप्रतियोगितायाः घट-
त्ववत्प्रतियोगिताप्रतियोगितावच्छेदकत्वस्य समभिव्याहारवकाज्ज्ञानसंभवव्युत्पत्तेः एवं नीलं सरोजं भवत्येवेत्य-
त्रापि सरोजपदस्य सरोजत्वविशिष्टलक्षणया नीलरूपवद्भिन्ने सरोजत्वविशेषभेदः प्रतीयते नचैवं क्रियासंगतैवका-
रस्यात्यंतायोगव्यवच्छेदार्थकत्वेनेन विरोध इति वाच्यं यथाश्रुतस्याप्रयुक्ततयार्थ एवनात्ययात् यथाहि अत्यंतायोग-
व्यवच्छेद इत्यत्रात्यंतपदमयोगेन संबध्यते व्यवच्छेदेन वा आद्येऽत्यंतपदस्यात्यंतं कीदृगिति न त्वादेसाकल्यार्थ-
नायाः प्रसिद्धत्वात् साकल्येन सरोजेयोऽयोगः सरोजत्वावच्छेदेनयोऽयोग इति यावत् तद्व्यवच्छेद इति पर्यवसितोर्थः सवा-
शक्यवचनः सिद्धसिद्धिभ्यां व्याघातात् द्वितीये नैल्यायोगस्य सरोजे साकल्येन व्यवच्छेदः सर्वस्मिन् सरोजे तस्य व्यव-
च्छेद इति पर्यवसितं तदपि श्वेतसरोजेनैल्यायोगस्य प्रत्यक्षसिद्धतया व्यवच्छेत्तुमशक्यं तस्मात् सर्वत्रान्ययोगव्यवच्छेद
एवार्थ इति वदंति अत्रैवं सति पदार्थाः सप्तैव प्रमेयं वाच्यमेवेत्यत्र कथं संगतिः सप्तान्यतमोपाधिमद्भेदस्य पदार्थस्य
प्रमेयवाच्यान्यस्य वा बाधसिद्धत्वात् तस्मादेवकारेण वाच्यं किमस्तीति चिंत्यं । ननु क्रियासंगतैवकारस्थले कथं व्याप-
कत्वमर्थः न तावद्भवन क्रियानिष्ठं सरोजमात्रस्य जन्यतयात दभिधानानर्थक्यात् नीलपदवैयर्थ्याच्च नच

नीलत्वविशिष्टभवनक्रियाव्यापकत्वं तदर्थः श्वेतसरोजे व्यभिचारादत आह त्वन्येति । वाक्यार्थविधया प्रतीतं पक्षमा
नाधिकरण्यं तदेवैवकारेणोल्लक्षणया नूघत इत्यभिहारव्याख्यायामर्थयोजना । एवकारशक्यस्य व्यापकत्वस्य प
दार्थतावच्छेदकद्वयसामानाधिकरण्येन संबंधस्य लक्षणया प्राप्तिरित्यर्थः ननु लक्षणया आवश्यकत्वे
सरोजपद एव सरोजविशेषणलक्षणास्तु तथा च पत्रसरोजविशेषणत्वं तत्र नीलविशिष्टसत्तावत्त्वमितिव्यापकत्व २३
मेव तदर्थः संगृहीतः स्यादत आह नीलमिति तथा च व्यापकत्वप्रतीतेरभावान्न लक्षणाकल्पनमिति भावः अत्र न
वीनाः व्यापकत्वं किमर्थमेवकारशक्तिः पादेरिवैवकारस्य शक्यतावच्छेदकतया तत्समभिव्याहृतपदादे
व तत्प्रतीत्युपपत्तेः यथा प्रजपतीत्यादौ प्रकर्षजित्वेन प्रकृष्टजपत्वेन वाच्यवाचकभावस्तथैवकारसहोच्चारि
तपंडुरपदत्वेन तद्व्यापकत्वे शक्तिरस्तु वस्तुतस्तु अनन्यलभ्यस्यैव शब्दार्थत्वाद्व्यापकत्वे तत्तत्पदलक्षणैव एवका
रस्तु तात्पर्यमात्रग्राहकः उपसर्गस्य द्योतकत्वोपपत्तिः स्वार्थयुक्तत्वात् अनन्यलभ्यस्य शब्दार्थत्वात् एतेन निर्भ
क्तीनामपार्थकत्वं व्याख्यातं एवंभूतत्वे घटो नेत्यत्र निनञ्पदस्य नाभावे शक्तिः किंतु तात्पर्यमात्रग्राहकत्वं
तस्य प्रतियोगिपदमेवाभावे शक्तं लाक्षणिकं वेति विभावयंति एवमेवकारवाच्यव्यवस्थामभिधाय प्रकृते यो

जयति तदिहेति यथाश्रुते सत्तान्यस्य पदार्थत्वव्यापकत्वे पदार्थत्वेन सत्तात्वानुमाने अधिकपदार्थवादिनो न किं
चिदनिष्टमापादितं स्यादत उक्तं सत्तान्यतमेति न च सत्तान्यतमत्वं नाम सत्तान्यान्यत्वं तच्च सत्तान्याप्रसिद्ध्या अप्रसि
द्धमिति वाच्यं द्रव्यत्वादिसप्तपदार्थविभाजकोपाधिदिनो न किंचिदनिष्टमापादितं स्यादत उक्तं सत्तान्यतमेति न च सत्तान्यत
विभाजकोपाधयोऽन्ये घटत्वादयः प्रसिद्धाः स्वदन्यत्वस्य द्रव्यत्वादिषु प्रसिद्धत्वात् शक्यादय इत्यादिपदेन संख्या
५ श साधर्म्यवैधर्म्यादिपरिग्रहः तेषु क्रमादिषु ननु सत्तान्यतमोपाधिमत्त्वेनाभावकथं पदार्थत्वानुमानं पदार्थविरोधित्वे
नसत्प्रतिपक्षितत्वात् इत्याशंक्य पदार्थविरोधित्वस्याहीनबलत्वं वक्तुं विकल्प्य दूषयति पदार्थविरोधित्वं हीति
तत एव द्रव्यादेरेव द्रव्याद्यात्मकत्वे तद्विरोधो यदापत्तेरेवं विपक्षे बाधकं तर्कस्य सत्त्वादिति भावः नेति द्रव्यादि
विशेषविरोधस्य पदार्थमात्रवह्न्यभावसाधनानुकूलत्वेन तर्काभावे प्रयोजकत्वमित्याशयः यद्येन सह विरुद्धं तत
न एतावन्मात्रस्मादत्यंतदेव विशदयति नहीति पराहतमिति तथा च स्वरूपासिद्धिरिति भावः ननु द्रव्याण
मेव प्रथमं विशेषोद्देशे को हेतुरत आह यथोद्देशमिति अत्र सामान्यत इति शेषः विभजते विशेषं न तु द्विशावी
न्यर्थः तथा च सामान्योद्देशक्रम एव विशेषोद्देशे नियामक इति भावः अत्र शेपेति अन्यथा लक्षणादिव्यवस्थानस्या

द्विति भावः अप्रयोजकतां निरस्यति नन्वीति· अस्ति तावद्युवानमवधिं कृत्य वृद्धे परत्वधीः वृद्धं चावधीकृत्य यू
न्यपरत्वधीश्च· तत्र ज्येष्ठस्य कनिष्ठत्वधीरत्व व्यतिरिक्ता व्यञ्जनिका· ज्येष्ठत्वं च वृद्धतरतपनपरिस्पंदान्तरितजन्म
त्वं कनिष्ठत्वं चाल्पतरतपनपरिस्पंदान्तरितजन्मत्वं एवं च तपनपरिस्पंदस्य तरुणशरीरसंबंधो वाच्यः स
च न साक्षात्संबंधस्तस्य सूर्यसमवेतत्वात्· क्रियात्वाद् वनतेन संयोगसंभावनापि· अत स्वच्छरीरसंयुक्तकालसंयुक्तसूर्य १४
समवाय एव तेन सह संबंधो वाच्यस्तथा तैत्परं परासंबंधघटकोपाध्यतिरिक्तकालासिद्धिरित्यर्थः इष्टानेति· तथा
च्यासति परत्वापरत्वव्यवहारव्यत्ययप्रसंगादित्यर्थः तदुपनायको· तस्याः सूर्यक्रियायाः संबंधघटको· शरीरसंयुक्ता
त्मसंयुक्तसूर्यसमवायादिना शरीरसंबद्धायास्तस्या ज्येष्ठत्वादिधीनिमित्तत्वमिति शंकाशयः अतिप्रसंगा
दिति· आत्माकाशयोरन्यधर्मोपनायकत्वे गोदावरीतीरेपि यमुनानीलरूपोपनयः स्याद्गोदावरीसंयुक्तात्मादि
संयुक्तयमुनायां नीलरूपसमवायात्· न च कालेप्ययं दोषः तस्य पूर्वक्रियामात्रोपनायकत्वेन सिद्धस्यान्यानुप
नायकत्वात्· तदिदमुक्तं विनाधर्मिग्राहकमित्यादि· अत्रेदं चिंत्यं· धर्मिग्राहकमानेन कालमात्रसिद्धावपि न तन्मा
त्रोपनायकत्वसिद्धिस्तत्र तस्योदासीन्यात्· न चातिप्रसंगभंगायैव तथास्वभावः कल्प्यत इति वाच्यं· एवं ह्यात्मन
स्तन्मात्रोपनायकत्वं धर्मिकल्पनातः इति न्यायात्· किंच त्वन्मते सूर्यक्रियोपनायकत्वमात्रस्वभावस्यापि तस्य
एव तथास्वभावः कल्प्यतां

कथं तयूनि वृद्धतरसूर्योपनायकत्वं वृद्धे वाल्पतरतनूपनायकत्वं· यदि च कल्पनायाः अतीत्यनुरोधीनयाऽयम
पाच्यस्तत्स्वभावः कल्प्यतां तदात्मन्यपि तुल्यं· यत्तु आत्मानोपनायकोविशेषगुणवत्वादिति· तन्नुच्छं· सूर्य एव व्या
भिचारात्· शरीरसंयुक्तसंयुक्तसमवायस्य सूर्ये घटितत्वात्· अव्यापकत्वस्योपाधित्वाच्च· न च दिशि साध्याव्या
पकता· धर्मित्वेव विवादात्· साधनावच्छिन्नसाध्यव्यापकतायाः सत्वाच्च· तथा चात्मैव काल इति नातिरिक्तका
लसिद्धिः· एतेन दिगपि व्याख्याता· तत्र निमित्तविशेषसमवधानवशादात्मन एव ×त्र१× वैकुण्ठादिष्विहनया
ध्यादिव्यवहारोपपत्तेः· एतदेवाभिप्रेत्य तार्किकशिरोमणिना तत्र दिक्कालौ नेश्वरादतिरिच्येते इत्यादिना अभिहितं·
·विभुद्रव्यान्तरस्येति· अत्रायमिदं चिंत्यं भवतु शब्दो गुणः भवतु वाऽभावातिरिक्त एवाकाशस्तथापीन्द्रियान्तरपारि
कल्पना क्षित्यादिकर्तृत्वेन सिद्धेश्वरस्यैव शब्दसमवायिकारणत्वोपपत्तेः· कार्यान्विवरावच्छिन्नस्येश्वरस्यै
वक्त्रो त्रतयानतदन्यथानुपपत्त्याप्यतिरिक्ताकाशसिद्धिः· न हि कर्णविवरावच्छिन्नमः श्रोत्रं नितादृगीश्वर
स्वधेत्यत्र श्रुतिरस्ति· यत्तु शब्दो जीवात्मसमवेत एवेति· न त्वतथासति अहं सुखी तिवदहं शब्दवानिति प्रत्यय
पत्तेः· तस्मान्नेश्वरस्वधेत्यत्र श्रुतिरस्ति· यत्तु शब्दो जीवात्मसमवेत एवेति· रातिरिक्ताकाशसिद्धिः· तदुक्तं
पत्तेः तस्मान्नेश्वरस्यैव शब्दसमवायिकारणत्वमित्यादि सत्वादावित्यादि यद
शिरोमणिना· शब्दनिमित्तकारणत्वेन कुत्रेश्वरस्यैव

नरजस्तमसोः परिग्रहः अन्यतमेनेति तत्र सत्वं सुखानुकूलादृष्टविशेषः रजस्त्वाद्दुःखादृष्टविशेषः तमः सं
हारकादृष्टविशेषः इत्यदृष्टान्तर्भावात्सांख्यमतनिरासः फलं द्वैविध्यं परत्वापरत्वाभ्यामिति शेषः ननु परापर
त्वापाये स्वतन्त्रस्याभावे पृथिवीत्वादेः कथं तन्मते परापरव्यवहार इत्यत आह दैशिकेति तादृशेति यावन्नित्यद्रव्यवृत्ति
त्वादित्यत्र यावदर्थानुपपत्तिं शंकते यद्यपीति अन्यथेति अन्यथा घटादिवृत्तित्वस्वीकारापत्तिरिति भावः १५
महाप्रलये कार्यमात्रनाशे शब्दस्यापि नाशाद्यावन्नित्यधर्मानियतव्याप्तृत्वायोगप्रसंगादाकाशे विशेषस्वी
कार आवश्यक इत आह ध्वंसेति सजातीयेति सजातीयनिरूपितो योऽपकर्षस्तदनधिकरणं या संख्या एकत्वादि
कानवच्छिन्ना या संख्या द्वयत्वाद्यन्यसंख्येति यावत्तदवच्छिन्नवृत्तीति विशेष्यत्वमित्यर्थः अपरिमिता विशेषा इति
प्रतीति विशेष्यत्वमिति यावत् असंभववारणाय प्रतीति पदं विषयत्व विशेषणे संख्यादावपि व्याप्तिरिति
विशेषत्वपदं अन्तःशून्यत्वं परिच्छेदशून्यत्वं व्यापकेति तथाच यावन्नित्यद्रव्यवृत्तित्वादिनिर्दिष्टत्वमन्वयः
नद्याकाशादौ देशतः कालतः परिच्छेदशून्यत्वं नित्यद्रव्यवृत्तित्वनिर्वचनमित्याशय इत्येके व्यापकसाधा
रणत्वात् व्यापकान्तर्भावप्रसंगादित्यन्ये नन्वनन्तत्वकथनस्य विशेषणे विभक्तविभागाभावेनात्यन्तिकत्वं वा
अन्यथा तदभिधानवैयर्थ्यप्रसंगात्तच्च न संभवति द्रव्याणामनन्तत्वे तथा विभक्तविभागाभावप्रसंगादन

आहद्रव्यादीति नन्वानंत्यस्य समभिव्याहृतैवकारेण सजातीयापकर्षानधिकरणसंख्याप्रतीतिविशेष्यत्वलाभ
णामनन्तत्वं व्यावर्त्तितेन त्वनन्तसंभव इति पूर्वसंख्याया अन्तरान्तरसंख्याव्यापकत्ववत्पूर्वसंख्याघटितोपाधेरप्युत्तर
संख्याघटितोपाधिव्यापकतयानन्त्यावश्यकत्वस्यापि निवृत्तिप्रसंगादित्यत आह अनुगतेति द्रव्यादौ द्रव्य
त्वादिना विभक्तस्य पृथिवीत्वादिरूपाः सन्त्यन्ये विभाजकोपाधयः नन्वेवं विशेषेष्वपि द्रव्यानन्त्यविशेषः तथाचै भ५
वकारसमभिव्याहृतानन्तपदस्य सजातीयापकर्षानधिकरणसंख्याप्रतीतिविशेष्यत्वे सति अनुगतनित्यैकवि
भाजकोपाधिशून्यत्वं विशिष्यमाणो विशेष्यः तेन समवायेन नित्यद्रव्येष्वेव नातिप्रसंग इति ध्येयं पदार्थत्वादिविशेषो
द्विविधः मूर्त्तवृत्तिरमूर्त्तवृत्तिश्चेत्यस्यैव विभाजकान्तरं तथापि कालादौ कानुगतविभक्तविभाजकोपाधि
शून्यत्वेनार्थे अत्रेदं चिन्त्यं किमर्थं नित्यद्रव्येषु विशेषकल्पनं व्यावृत्तिबुद्ध्यर्थमिति चेत् नहि परमाणुरू
पकर्मणोरविकुर्वतानन्तस्वीकारः नवभुक्तकवमत्वादिजातिभिरेव तत्र व्यावृत्तिः संभवतीति वाच्यं परमाणुनि म
छदशत्रुकृतमादिरूपव्यक्तिषु गत्यन्तराभावात् न च विशेषस्य परमाणुसर्वेत्वेन तत्र व्यावृत्तिः वैपरीत्य
स्यापि सुवचत्वात् किंच विशेषेषु कथं परस्परव्यावृत्तिः व्यावर्त्तकान्तरानिरूपणात् ननु किं विशेषाः स्वतएव

न·प्र·प

व्यावृत्तमिति न्यायेन स्वत एव विशेषो व्यावर्तत इति वाच्यं· तर्हि नित्यद्रव्यपरमाणावेवास्तु स्वत एव व्यावृत्तत्वं लाघवात्·
प्रत्यक्षत्वस्वातिरिक्तं विशेषमीक्षते योगिन इति चेत्· तर्हि तत्र विषये संशयापत्त्या: किमत्र भवेनोऽतिरि
क्तं विशेषमीक्षते न वेति· सुगमं चैतन्न्यायशिरोमणिमतरहस्याभिज्ञानामिति नात्र बहु लिख्यते बालानामधिका १९
रादिति· ननु समवायैकधर्मकत्वं तस्याद्रव्यत्वात्· न वैकार्थसमवायेनैकत्वाश्रयत्वमस्त्येवेति वाच्यं विशेषे
ववित्वात्· न चान एवावधारणं त्रासंभवात् घटसमवायौ द्वावेतित्वयादत आह एकत्वमिति· स्वपदा
र्थविभाजकोपाधिः समवायत्वं· तदाश्रयः समवायः तदन्योन्याभावेन घटादिनिष्ठेनासमानाधिकरणः पदा
र्थविभाजकोपाधिः समवायत्वं तद्वत्त्वमित्यर्थः नच विशेषत्वेन तथा· विशेषत्वस्य स्वाश्रयपार्थिवपरमाणुनि
ष्ठविशेषान्योन्याभाववति जलपरमाणुविशेषादौ सत्त्वादिति ध्येयं· तद्विशेषत्वादिकमादाय तद्विशेषेऽवि
व्याप्तिवारणाय पदार्थविभाजकपदे· नन्वभावत्वानुविद्धाभिधानेऽभावो द्विविधः संसर्गाभावोऽन्योन्याभाव
श्चेति ग्रन्थान्तरविरोध इत्यत आह इहेति· तत्रैवोक्तग्रन्थसंवादमाह ध्वंसत्वादिति चेति· ननु यथाग्रन्थान्तरे द्वै
विध्येन सामान्यविभागेऽपि शिवादित्यमते त्रैविध्यमेव अभावत्वानुविद्धमेतन्मतमस्त्यत आह· अत एव चै
ति· यन एव संसर्गाभावो पार्थक्यं विभागान्तरमत एवेत्यर्थः अन्यथा अनागतपदयोर्वैयर्थ्यं स्यादिति

भावः बाधेति· पृथिवीमात्रस्य नित्यमात्रस्वभावत्वे बाधः परिदृश्यमानघटादिपृथिवीध्वंसस्येति शेषः· अप्रा
माणिकत्वमपि नित्यत्वएवान्वेति· अनित्यमात्रस्वभावत्वेत्वेवमवानुपरमप्रसंगोऽवयवानवच्छेदं नियाव-
त्· विभक्तेति· पृथिवीत्वेन विभक्ताया नित्यत्वानित्यत्वरूपं विभाजकोपाधिमाहेत्यर्थः· विरोधमिति· ध्वंसाप्रति
योगित्वध्वंसप्रतियोगित्वयोः परस्परविरहरूपत्वादित्यर्थः· विषमेति· नित्यत्वानित्यत्वरूपं विभाजकोपाधि
माहेत्य प्रदेशान्नयमनेनेत्यर्थः· गगनादिदूषणपरिहारायावधारणगर्भनियाख्यावष्टे परमाणुविति· ननु
न सापीति मूलेन तच्छब्दे नित्यानित्यपरामर्शः स्वसिद्धान्ते नित्यशरीराद्यनभ्युपगमात्· नाप्यनित्याया स्त
दायपरामर्शः तथा सति अप्यन्वयानुपपत्तेः पूर्वं नित्यपृथिवी त्रैविध्यस्यानभिधानादत आह एवं
स्मिन्निति यथा पृथिव्यामवान्तरभेदोऽस्ति तथा कार्यपृथिव्यामप्यवान्तरभेदः त्र्यवान्तरभेदवत्त्वे
समुच्चयार्थोऽपिर्ननु त्रैविध्यसमुच्चयार्थोऽतोऽवासानुपपत्तिः एवमिति· अवादिप्रकारेणेत्यर्थः· शरीरमस्म
दादीनामित्येव वक्तव्यं ननु प्रत्यक्षसिद्धमित्यपि व्यर्थत्वात्· नच प्रमाणोपन्यासपरं तदिति वाच्यं· तदुपन्यास
स्य संदिग्धं प्रति फलवत्त्वं तथा शंकाया अभावेन तस्यापि वैयर्थ्यात्· शरीरमिव विषयेन्द्रिययोरपि तदभिधानप्र
स्या

प्र·टीप २

संगाद्य·नचदेहलीप्रदीपन्यायः विषये लिंगत्वयायोगात्· इंद्रियेऽर्थान्वयायोगादत आह नत्विति· शरीराद
यहत्यादिपदेन विषयपरिग्रहः बहुवचनं व्यंजकमिप्रायेणद्रष्टव्यं परमाण्विति· तथा च शरीरादिकं निरूप्य पृथि १०
वी भेदोदाहरणमेव युक्तमिति भावः ननु लिंगत्वत्यागेन प्रत्यक्षसिद्धत्वस्य विवक्षायां प्रत्यक्षमेव पिकयालिंगेंद्रिया
न्वयः तस्य नित्यातींद्रियत्वादत आह यथायोगमिति· प्रत्यक्षेण सिद्धं प्रत्यक्षसिद्धं तत्त्वं च प्रकृत विलक्षणतया कविद्
ययतयेति यथायोगमित्यर्थः लिंगत्वत्यागेन· पुल्लिंगाध्याहारेण· यथायोगमित्येतदेव स्पष्टयति· तद्यमिति· अन्यथा
दुरिंद्रियागोचरस्य एकदेशस्य सजातीयसंवलनेन प्रत्यक्षत्वं तथा परमाणुष्वपि कुतो नस्यादिति कश्चित्· तन्न·
तत्र हि दुरत्वदोषादयोग्यपि केशः सजातीयसंवलनव्यतिरेकेन प्रत्यक्षमिति भवतु तथा· न च तस्य योग्यत्वमेवास्ति
इति वाच्यं तथा सति सन्निधानदशायामपि साक्षात्कारोन स्यात्· परमाणौ तु योग्यतैव नेति कुत्र सजातीयापे
क्षा· नहि मलिनमना अपि स्वसन्निकृष्टमपि परमाणुमाकलयति लोक इति दिक्· तदन्यौ· परमाणुद्व्यणुकान्यौ· स्व
तिषयो यस्मिन्तु तत् स्वविषयं तच्च तत्पृष्ठं चेति स्वविषयपृष्ठत्वं ततस्त्वा धार्यः स्वस्य विषयो ज्ञायोग्यः धादिस्तत्र
त्यक्त तदित्यद्वितीयार्थः तथा च मूलप्रत्यक्षसिद्धमिति नविषयतया मतं तात्पर्यं किंतु करणतयापीति नेंद्रिये
ऽनन्वय इति भावः एतदेव स्पष्टयति नहीति· तस्य· इंद्रियस्य· असिद्धिरिति· अतीन्द्रियत्वाविशेषादिति भावः

१४

अतिप्रसंगादिति· अवच्छिन्ननासिकस्यापि गंधोपलब्धिप्रसंगादित्यन्ये· गंधव्यंजकेति· एवं चच्छिन्ननासि
कस्यापि गंधोपलब्धिप्रसंग इत्यर्थः· हस्ताद्यवच्छेदेन गंधोपलब्धिप्रसंगादित्यन्ये· हस्तावच्छेदेन वानदो
तपत्तिः नासिकाग्रावच्छिन्नपरमाणूनामभावात्तेषामेवेंद्रियत्वादिति आशयः अत्राऽऽत्माश्रयादिति· अवच्छे
दकधर्मः ध्वंसजनकतावच्छेदककोटिप्रवेशादित्याशयः पार्थिवेति· अवच्छिन्ननासिकस्य वक्ष्यमाणगंधव्यंजकत्वाप्रयोजकत्व
बुद्धिं वारयितुं पार्थिवेति विशेषणं· ननु घ्राणत्वेनैवास्तु गंधव्यंजकता इत्याशंक्य न तत् किमुपाधिरूपं ज
तिरूपं वेति विकल्प्याद्यदोषमाह ज्ञानान्य दिति· दुर्निरूपमिति· पूर्वोक्तरीत्येति शेषः द्वितीये तु परमाणु
भिन्नेंद्रियसिद्धिरनिवार्येत्याह इत्यवच्छेदकेति· इंद्रियनिष्ठगंधव्यंजकतावच्छेदकजातित्वमित्यर्थः तेन
घ्राणत्वंजातिः कथं व्यंजकतावच्छेदकतावच्छेदिका· तादृशसंयुक्तसमवायाद्यवृत्तितया न्यूनदेशवृत्तित्वादि
ति निरस्तं· अनतिप्रसक्तत्वमात्रमवच्छेदकत्वं तेन न्यूनवृत्तेरपि तत्त्वमविरुद्धमित्यन्ये· सत्तान्येति· द्रव्यत्वसाक्षा
द्व्याप्यजातयः पक्षे तेन पृथिवीत्वादिवत्सकलपरमाण्वाश्रयत्वमसिद्धं· परमाणोसत्वापत्त्या पिविद्यमानत्वादतः
सत्तान्येत्यर्थकं· न चैतावतापि कथमसिद्धिनिरासः सत्तान्याः याः द्रव्यत्वसाक्षाद्व्याप्यजातयः पृथिवीत्वा

स.र.प. रा

दृपश्चतस्पष्टवप्रकृतेनहिनमात्राश्रयत्वंसंभवतिसत्तायाअपिसत्त्वादितिवाच्यं· द्रव्यत्वसाक्षाद्व्याप्यजा
तिमाञाश्रयत्वंहि द्रव्यत्वसाक्षाद्व्याप्यजात्याश्रयत्वेसतिद्रव्यत्वसाक्षाद्व्याप्यजातीतरजात्यनाश्रयत्वं·
द्रव्यत्वसाक्षाद्व्याप्यजातीतरावजातिर्घटत्वादिकासत्तावतत्रसत्तामादायातिव्याप्तिनिरासायसत्तान्यत्वमितर
जातेर्विशेषणं· तादृशीचपृथिवीत्वादिव्याप्याघटत्वसमुद्रत्वादिरूपैवतदनाश्रयत्वस्यैवपरमाणौसत्वान्नाप्रसि ...१८
द्धिः ननुतथाप्यप्रसिद्धिः सत्तान्यद्रव्यत्वसाक्षाद्व्याप्यत्वंहि द्रव्यत्वव्याप्यजातीतरजातेर्द्रव्यत्वस्यापिपरमा
णौसत्वात्· नचतस्यापिद्रव्यत्वसाक्षाद्व्याप्यतयातदितरत्वाभावादेवनदोषइतिवाच्यं· द्रव्यत्वसाक्षाद्व्या
प्यत्वंहिद्रव्यत्वव्याप्यव्याप्यत्वंनचद्रव्यत्वंतथा· द्रव्यत्वव्याप्यगुणत्वकत्वव्याप्यतयातस्यतद्व्याप्यत्वादि
तिचेत्· मैवं· एवंहिपृथिवीत्वादिकमपितथानस्यात्· तस्यापिद्रव्यत्वव्याप्यगुणवत्वव्यापकत्वात्· किंतुद्र
व्यत्वव्याप्यजातव्याप्यत्वंतदर्थः गुणवत्वंनजातिः नचैवमपिद्रव्यत्वव्याप्यद्रव्यत्वाव्याप्यत्वाभावात्· द्रव्यत्व
स्यतदितरतयाऽप्रसिद्धिः स्यादेवेतिवाच्यं· द्रव्यत्वन्यूनवृत्तिजातिव्याप्यत्वस्यसाक्षाद्व्याप्यपदेनविवक्षणात्·
द्रव्यत्वस्यचद्रव्यत्वन्यूनवृत्तिपार्थिवीत्वादिव्याप्यतयाद्रव्यत्वसाक्षाद्व्याप्यत्वात्तदितरत्वाभावान्नासिद्धिः

लो२

अत्रचस्वेतरत्वंद्रव्यत्वन्यूनवृत्तिजातिविशेषणंदेयंतेननासंभवः गुणत्वादौद्रव्यत्वसाक्षाद्व्याप्यत्वंपरिह
र्तुंद्रव्यत्वव्याप्यत्वंविशेषणंदत्तमितिसंक्षेपः अत्रेनुसत्तावत्रान्यत्वद्रव्यत्वसाक्षाद्व्याप्यजातिसत्त्वनत्वा
त्रायइत्यर्थः अन्यपदेनद्रव्यत्वग्रहणंनमात्रपदादुपपत्तिरित्याहुः नसमानैति· प्रत्यक्षाक्षात्कारः सुखदुः
खान्यतरहेतुरित्यादिनेतिनामेः तितितस्याविद्धांबेऽती द्रुयत्वादितिभावः नथाभूतेति· सुखदुःखान्यत
रजनकसाक्षात्कारविषयेत्यर्थः नत्वेति· विषयत्वोपचारइत्यर्थः उपचारइतिवदता। नामेविषयत्वाभि
धानंप्रामाणिकमितिफक्कं भवतिनचसुखदुःखान्यतरजनकसाक्षात्कारविषयगुणाश्रयत्वमेसविस
पत्वलक्षणमंक्रांतश्चवायातव्याप्तीतिवाच्यंतथासतिनभसोपिविषयत्वासंपत्तिः वीणानिधक्वृतेति
तसाक्षात्कारानंतरंसुखदुःखयोरनुभवसाक्षिकत्वादितिध्येयं· अयुक्तमिति· चातुर्विध्यविरोधित्वादितिभा
वः विशेषमेवस्पष्टयतिबहिरिति इत्यादिना उपधेयेति· उपधेययोरुपाधिमतोर्विषयप्राणयोः संकरेपिपरस्प
रविभाजकोपाधिमत्वेपिनुपाधेर्विभाजकस्यविषयत्वस्यप्राणत्वस्यचभेदएवेत्यर्थः विभाजकधर्मभेदादे
वसर्वत्रविभावः नातिरिक्तमिति· शरीराभ्यंतरचरणमात्रस्वभावत्वंनतत्· नचबाह्यस्तथा· बहिर्विधमानतादृशा

यांतद्व्यभिचारादिति भावः असंभवादिति· प्राणवायोरपि बहिर्निर्गमनदशायां तदभावादित्यर्थः एवंभूतेनि
आशिलपीतरसप्रापके· न स्वस्य· अपवरकस्थितस्य· तत्र· वायोः प्राणिति व्यंजनव्यापारादिति शेषः अ
द्भाविनतयेन· यांग्पत्येत्यर्थः अनुद्भूततयेति· व्यंजकविरहेणेत्यर्थः तथा च व्यजनादिसंयोगव्यंग्यस्पर्शा
श्रयोऽतिरिक्त एव वायुः स्वीकर्त्तव्य इति भावः तेनानुद्भूतादियद्प्रतीतिजातिविशेषवृत्तौ कादाचित्कव्यं
जनसंयोगादेः कथं प्रयोजकत्वमिति दूषणं परास्तं· अनुद्भूतस्पर्शतयेति· साक्षात्कारप्रयोजकतयोद्भू
तत्वजातिकल्पनं परमाणुस्पर्शानां वातीद्रियत्वात्तत्कल्पने मानाभावादिति भावः कल्पयेतेति· अनार
भ्यद्रव्यस्यत्वच्छिन्नेन कल्पत्वपेन नानुपपत्तिरित्याहिति योजना: भूतेत्व इत्यनुशासनान्प्रजानार्थ्य
इत्यत्र्याऽर्थादिदिनीद्व्यारंभत्नाभरत्याशयः मूलेआकाशेति· नन्वेवं घटाकाशः पटाकाशानेतिप्रतीति रा
वत्संयोगावच्छिन्नोपि प्रतीति· सत्वादव्याप्यवृत्त्यन्योन्याभावप्रसंग इति चेत्र इष्टापत्तेः सत्त्विसाधक प्रमाणे
ऽपसिद्धान्तापादनस्य राजनिदेशमात्रत्वात्· तदव्याप्यवृत्तित्वसमर्थनविष्यमाणत्वाश्च· नन्वेवमाकाशत्वं मा
जातिः स्यादनेकाकाशसमवेतत्वादिति वाच्यं· व्याप्यवृत्तिस्वाश्रयान्योन्याभाववत्समवेतत्वस्यानेकस

त्त्वात्· तस्मात्परिहरवाः संयोगव्याप्यवृत्तित्वं स्वीकुर्वतापा व्याप्यवृत्तित्वमिति दुस्तराप्रतिबंदितरं गाणी· नव
सत्त्वाव्याप्यवृत्तिगुणसमानाधिकरणाव्याप्यवृत्तिवृत्तिजातेर्व्याप्यवृत्तिवृत्तित्वमिति नियमः द्रव्यत्वं च गुणस
मानाधिकरणमेव तिन्न तत्र व्यभिचार इति वाच्यं· अप्रयोजकत्वात्· नहि सहचारदर्शनमात्रेण नियमसिद्धिः अ
प्रसंगात्· किंचैवं त्वन्मतेऽतिरिक्तधर्मिकल्पनाभन्मतेतु क्लृप्तैरेव चित्रप्रतीतिरत्य परलाघवं· एतेनासतिबाधकेऽनु
गतमते जातिसाधकत्वं नात्र सर्वत्रावादिसंमतत्वाच्चानुगतमतिरस्ति चित्ररूपमिदं चित्ररूपमित्याकाराप्रकृतेपीति
चित्रत्वजातिसिद्धौ तदाश्रय चित्ररूपसिद्धिरनायत्त्यैव· नचैवं नैवंत्वमपि जातिः स्यादनुगतमतेः सत्त्वादिति वाच्यं
· नीलत्वादिना परापरभावानुपपत्तेरिति परास्तं· इह्यापि सत्त्वादिना सांकर्यात्· नचात्र व्याप्येनानैव चित्रत्व
मिति वाच्यं· तुल्यवनत्वेति· अतएव चित्ररूपे तिति प्रतीतेरनेकविजयत्वे गौरवमेकविषयत्वे लाघवमित्येवं
वाल प्रलापाः परास्ता वेदितव्या इति· यदपि नीलपीततन्तुद्वयारब्धेकपटरूपेक्याभावकार्यैक्यनिबंधने
नीलपीतयोः सहकारित्वमुचितं स्यादित्यभिधायि· तदप्यतात्तद्गत्या· तथा सति कपालनिष्ठरूपर
सगंधस्पर्शानां घटरूपादि[illegible]जनकत्वं न स्यात्· नहि सहकारिभावमापन्नानां वा तेषां स्यात्· अयोक्तं

वा स्यात्· नाद्यः कार्यैक्याभावात्· न द्वितीयः वायावपि रूपाद्यापत्तेः तदवयवे स्पर्शस्य सत्त्वात्· यदि च रूपे
णरूपं गंधेन गंध इत्यादिक्रमेण प्रत्येकमेव जनकता न तु तेषां सहकारिता तदा नीलेन नीलं पीतेन पीतमेवारभ्यतामिति 22
न तयोरपि परस्परसहकारिता न हि तयोः परस्परसहकारितामानाभावः प्रमाययेति· अपि च नीलं नीलेतररूपाजनकं नी
लत्वाद्व्यतिरेकेण पीतादिवदिति नियमादपि न चित्रं रूपांतरं· तथा च नानारूपसमाहार एव चित्रं रूपं· एतदेव सर्वम
भिसंधाय शिरोमणिभट्टाचार्यैरपि हितं चित्रमपि नातिरिक्तं रूपं सामानाधिकरण्यात् विजातीयरूपसमुदायादेव त
थाव्यवहारोपपत्तेरित्यादि· तस्माच्चित्ररूपांगीकारे युक्तिश्चिंत्या· एवं चित्ररसे पीतिं विभावयंति· आहुरित्यनेन
यत्र चित्ररसवदवयवारब्धा हरितकी तत्र यथर्कं हरीतक्यां चित्ररसा हरीतकीति व्यवहारात् हरीतक्याः षड्रसैः स
हैकार्थसमवायाभावात्· न च चित्ररसवदवयवारब्धाहरीतक्यां रीतक्यैवासिद्धेति वाच्यं· हरीतक्या मितरत्व
वंडेष्वपि षड्रसानामनुभवसाक्षिकत्वात्· न च षड्रसैः कार्यसमवेतसमवायस्तत्र तथा प्रत्यय नियामक इति
वाच्यं· अनुगमादित्यस्वरसं सूचयन् न च चित्ररसांगीकारं समर्थयंते यद्वेति· आरंभकमधुरादिरसानां परस्परवि
रोधाच्चित्ररसानंगीकारो यथा शीतोष्णस्पर्शयोर्विरोधेन चित्रस्पर्शानंगीकारः तान् हि संप्रदायस्तो दूषयति·

आरंभकेति· आरंभकानां गुणानां विरोधः परस्परासहकारित्वमिति यावत्· आरभ्यस्य कार्यस्याविरोधोऽनुभवेन वि
रोधोऽनुभवासिद्धत्वमिति यावत्· तथा च यत्र कार्यमनुभवासिद्धं तत्रैवारंभकगुणानां परस्परासहकारित्वमिति
पर्यवसितोर्थः अन्यथोक्तवैपरीत्ये· आरंभकगुणविरोधस्यारभ्याविरोधाधीनत्वाभावो द्वेधा· स्पर्शद्वयारंभकविजाती
यत्वप्रयुक्त्या· नियामकशून्यतया च· तत्राद्यदोषमाह चित्ररूपमपीति· तत्र नीलपीतादीनां विजातीयत्वादित्या
शयः तस्याद्वेति· अत्रेदं विचार्यते· अतोकारोपसामग्र्यो ऽस्ति तारोपसामग्रीपदेन निश्चयत्वावच्छिन्नसामग्री वि
वक्षिता ज्ञानसामान्यसामग्री वा· आद्येऽनुक्तोपालंभः निश्चयसामग्र्याः संशयोत्पत्त्यनंगीकारात्· अयोगाच्च· अ
न्त्यसामग्री अन्यत्राजनकत्वात्· नहि घटसामग्री पटं जनयितुमीष्टे· न त्वेवं संशयः क्वापि न स्यादिति वाच्यं· कोटि
स्मरणात्मकविशेषणज्ञानादिरूपायाः सत्वे बाधकाभावात्· पुरुषत्वविशिष्टज्ञानत्वादेरेव पुरुषत्वादिज्ञान
जन्यतावच्छेदकत्वात्तस्यापि संशयसाधारणत्वात्· इयानेव विशेषो यदुभयकोटिभानसामग्री सत्वे विरोधी पस्थि
तौ च तदुभयज्ञानं संशयात्मकं विरोधानुपस्थितौ च स्थाणुः पुरुषश्चेति निश्चयात्मकमिति· तस्मान्निश्चयसामग्री सं
शयजनिकेत्यसंगतमेव· अतएव सामान्यतः स्थले विरोधिपरामर्शाभावे विशेषदर्शनस्यतयान्यनिश्चयका

स॰रा॰पं॰

रणत्वस्यांशे संशयरूपानुमितिः नापरः संशयस्या विपर्ययैकविषयकज्ञानतया तादृशसामग्र्या ज्ञानजन्यत्वे विरोधवा
त्रीयाश्रयाभावादिति । द्वितीय आह स्यादिति । तथाविधनियामकत्वाभावात् आरंभकविरोधो रूपस्थले नास्तीत्यंगीकृत्य चित्र 23
रूपांगीकारस्तथा सुरभ्यसुरभिणोः अवयवयोः अपि तन्मतेनांगीकृत्य चित्रगंधोऽस्त्वित्यर्थः मदुक्तनियमे तु नैते दोषाः चित्ररूपसंशययो
रनुभवासिद्धत्वात् चित्रगंधस्य चानुभवासिद्धत्वाद्गन्धाश्रयः स्यादेवेति । अत्रापीदं विचारणीयं । चित्ररसांगीकारेऽपि षड्
रसा हरीतकीति व्यपदेशस्य मानसत्वमेव स्पष्टं । रसनस्य द्रव्याग्राहकतया उपपत्तिः स्यवबहिरिंद्रियजबोधे विशेषणतयै
वभावमानतया रसेन हरीतकी विशेष्यस्य रसचित्रत्वस्यानुपपत्तेः । नादृष्टक्रमेणैवोपपत्तावनित्यावयवेऽवयवनिष्ठ
नानारसोपनयसहकृतेन मनसैव चित्ररसा हरीतकीति प्रतीत्युपपत्तौ न रसान्तरसिद्धिः अस्तु वा षड्रसा हरी
तकीति रसनस्य वत्थ्यः मानसत्वोपनीतस्य बहिरिंद्रियजन्यबोधे विशेषणतयैवभाननियमस्तथापि नत्वे
तद्रूपापलापः त्वगुपनीतेन हरीतक्यादौ रासनबोधस्य व्यवहारवच्चित्ररूपस्थलेऽपि चक्षुःसंयुक्तत्वात् । त्वगुप
नीतेऽपि व्यवहिते शुक्लादौ चित्रः शुक्ल इति प्रतीतिः तथा चक्षुषोपनयार्थमेव वा शुक्लाशुक्लस्येति चित्ररू
पांगीकार आवश्यकः नत्वानुमानोपनीते शुक्लादौ चित्रः शुक्ल इति प्रतीतिरितिवाच्यं । एवं हि वस्तुपेक्ष्या

24

अहेतुकत्वमेव स्यात् अनुमानाद्युपनीतं परमादाय शुक्लः पीत इत्यादिप्रतीतिनानुपपत्तेः अनुभवविरोधाभिधानं तु
तु चित्ररूपस्थले विद्यमानं तस्माच्चित्ररूपांगीकारे च चित्ररूपांगीकारः संभावनायामिति इत्येवमन्तं मिति । पूर्वं द्वैविध्य
स्यानुक्तत्वात् द्वैविध्यसमुच्चयार्थकतापि शब्दस्यानुपपन्ने यत आह रान्तरेति । यथा रसोऽनंतरावधावासन्नावाऽ
धारात्परेऽर्थ इत्यर्थः नाघट्टत्व न तादृशावयविन एवासिद्धेः उभयाश्रितावयवारब्धावयवीनस्वेत्यर्थः ननु तादृशाव
यवीस्वीकारे किंबाधकमिति शंकायां सोऽवयवी तेजस्त्वादिजातिमान्नवेति विकल्प्यां तत्राह विरुद्धेति । तथा चनैकं
वद्व्याणीति व्याहतं स्यादिति भावः आद्ये आह पृथिवीत्वादीति । पृथिवीत्वमा[illegible]दिर्घस्येत्यतलक्षणसंविहान
वद्व्रीहिणा जलत्वतेजस्त्वयोरुपादानं । दीपनयोः परस्परपरिहारेणावर्तमानयोः तेजस्त्वजलत्वयोः उभयाश्रितावयवा
रब्धावयविनि समावेशादित्यर्थः उभाभ्यामुद्भूतानुद्भूतस्पर्शाभ्यां । अन्यासिन् अनुपलभ्यमानावयवीत्यर्थः उभयेति
। उद्भूतानुद्भूतस्पर्शवद्वयवारभ्यत्वरत्यर्थः क्वचिदनुद्भूत एव क्वचिदुद्भूत एवेति नियमानुपपत्तिर्विनिगमकाभा
वादिति भावः नाभिन्नेति । अदृष्टविशेषसंसर्गादित्यर्थः तदुक्तं कुसुमांजलौ अदृष्टभेदसंसर्गादुद्भवानुद्भवादयः
ति । वैपरीत्यस्येति । उद्भूतादनुद्भूतस्येत्यर्थं उद्भूत × अन्यथेति । × रूपाधः स्थितानलानुद्भूतरूपतोल स्थितानल

द्व्याभ्यां प्रत्येकमारब्धमित्यर्थः अयमाशयः उद्भूतरूपाधःस्थितज्वालारूपेण वह्निना तत्तैलस्थानलैकीद्रूप
मारभ्यते न तावदुद्भूतं तैलस्थितानलस्य वायुसंयुक्तताप्रसंगात् महत्त्वसामानाधिकरण्योद्भूतरूपत्वस्यैव द्रव्यचाक्षु २४
षताप्रयोजकत्वात् नाप्यनुद्भूतं तदुक्तनियमभंगापत्तेरिति तत्र चित्ररूपारंभो दुर्वारः एवमनुद्भूतरूपतैलस्था
नलेन तत्तैलस्य जलसंयोगादारब्धे ज्वालारूपे वह्निना तावदनुद्भूतरूपारंभः ज्वालामात्रे वायुपृक्तत्वापत्तेः उद्भू
तरूपारंभस्त्वरीत्या नियमभंगप्रसंगादेवानुपपत्तेरिति तत्रापि चित्ररूपारंभो दुर्वारः न चैवमपि कथं तज्ज्वालायाश्चाक्षु
षता चित्ररूपसत्त्वेऽप्युद्भूतरूपाभावादिति वाच्यं महत्त्वसमानाधिकरणानुद्भूतरूपा— भिन्नरूपवत्त्वस्यैव चाक्षुषता
प्रयोजकत्वकल्पनायाः फलानुसारित्वात् यद्वा उद्भूतरूपाधःस्थितानलानुद्भूतरूपतैलस्थितानलद्वयाभ्यां समु
दिताभ्यामारब्धे ज्वालारूपे तेजसीत्यर्थः अत एव द्वयपदोपादानं न च जलसंगात्तैलस्थितानलेनैव ज्वालारंभोपपत्ता
वधःस्थितानलस्य तद्धेतुत्वमानाभावादिति वाच्यं तथा सति महानसादवतारिततप्ततैलस्थानलेनैव ज्वालारंभोपपत्ते
जसि ज्वालारंभः स्यात् न चेष्टापत्तिरनुभवविरोधादिति पार्थिवत्वं ह्लानत्वं पार्थिवसाधारणधर्मत्वं अन्यथाऽनु
कूपयाद्यवाप्याऽसंगत्यापातादिति ध्येयं अत्र प्रागल्भ्यानुसारिणः चित्रस्पर्शांगीकारः प्रामाणिकः न वोदाहरणाभावः

पाकजापाकजस्पर्शवदवयवारब्धे पार्थिवावयविनि चित्रस्पर्शसंभवात् उभयारब्धत्वेनान्यतरनियमनेऽतिगम
काभावात् न चोष्णशीतावयवारब्धे जलत्वादिजातिसंकरस्तथा विनातिसंकरशंका जलादौ पाकजगुणानंगीकारा
त् तत्र पृथ्वीत्वजातेरंगीकाराच्च न वा गृहीतभेदसंसर्गाग्रहादुद्भूतवाद्यदतिवद्दृष्टभेदादेव पाकजापाकजव्यवस्थोपपत्त
थास्यात् तस्माच्चित्रस्पर्शोऽवश्यमंगीकार्य इत्याहुः तन्न तत्र पाकजस्यैव स्वीकारात् पाकजत्वं नाम तेजःसंयोगासमवा
यिकारणकत्वं अपाकजत्वं च कारणगुणपूर्वकत्वं तथा च तस्य कारणगुणपूर्वकत्वात् पाकजत्वमेव सः अत एव परमाणौ पाक
जः स्पर्शः द्व्यणुकादौ तु पाकज एवेति वैशेषिकराद्धांतः अपरे तु परस्य घटस्य कतिपयकपालावच्छेदेनैव दहनसंयोग
स्तत्र तेन दहनसंयोगेन घटनिष्ठपूर्वस्पर्शनाशात् परकपालस्पर्शाभ्यां सह संयोगाभ्यां चित्रस्पर्शारंभसंभवात् न च पद
वच्छेदेन दहनसंयोगो विरोधी उत्पन्नस्तदवच्छेदेन पूर्वस्पर्शनाशेऽप्यपरभागावच्छेदेन पूर्वस्पर्शनाशमानाभावादिति
वाच्यं अव्याप्यवृत्तिनानास्पर्शापत्तेः न चैकस्य स्पर्शस्यैकदेशे किंचिन्नष्ट इति संभवति सिद्धांतप्रसंगात् याविरोध्याव्याप्यावि
ष्टापत्तेरप्यसिद्धेतुमशंक्यत्वात् अथ तत्र कथं पूर्वस्पर्शनाशः सर्वावयवावच्छेदेन संयोगाभावात् न च पूर्वस्पर्शवति स्प
र्शांतरोत्पत्तिः संभवतीति चेदेवं तथासति संयोगस्याव्याप्यवृत्तित्वापत्तेः न च प्रत्येकं यावदवयवावच्छेदेन दहनक्रिया

वद्दहनसंयोगत्वेन नाशकता अकृतेवापरावयवावच्छेदेन दहनसंयोगाभावात् न पूर्वस्पर्शनाश इति वाच्यं गौ
रवात् लाघवात् समानाधिकरणदहनसंयोगत्वेनैव नाशकत्वात् अत एव यत्किंचिदसमवायिकारणनाशादेव द्रव्य २५
नाशइति गौतमीयं खंडपदोत्पत्तिः स्थितेति तथा च दाहत्वे समवायिकारणवैजात्यात् चित्रः स्पर्शः स्यादेव
विजातीयनीलपीतरूपाभ्यां चित्ररूपस्य दृष्टत्वादिति चेन्मन्मतेऽयं वर्तयेति अत्र नव्याः चित्रत्वे विजातीयासम
वायिकारणजन्यत्वं न प्रयोजकं किंतु यद्गुणविभाजकोपाध्याश्रयस्य चित्रत्वं तद्गुणविभाजकोपाधिव्याप्यवि
रुद्धजातिमद्भिन्नरूपान्यतरजन्यत्वं नचैवं अकृतेसंयोगजत्वस्य स्पर्शत्वव्याप्यत्वाभावात् रूपे तु संभवति रूपत्वा
श्रयस्याहि चित्रत्वं तच्च रूपत्वव्याप्यनीलत्वपीतत्वादिलक्षणविरुद्धजातिमन्नीलपीतरूपजन्यत्वस्याविधमा
नत्वात् नच लाघवाद्विजातीयासमवायिकारणविशेषान्यतरजन्यत्वमेव चित्रत्वे प्रयोजकं ननु विरुद्धजा
त्योस्तथात्वमपि गौरवादिति वाच्यं तथा सत्यनित्यलाघवाद्विजातीयसमवायिकारणत्वात्तत्रजन्यत्वमे
व चित्रत्वे प्रयोजकं स्वीकृत्य ज्ञानादिकमपि चित्रं स्यादिति लाघवादरेण साधुसंरक्षितापत्तेरिति किंच प्र
त्येकमवधृतसामर्थ्याभ्यां संख्यापरिमाणाभ्यामारब्धं चतुरणुकादिपरिमाणमपि चित्रं स्यात् स्याद्वेनादनामि

वात् अत एवाघसंयोगविभागासमवायिकारणं कर्मेति कर्मलक्षणव्याख्यानावसरेऽसमवायिकारणत्वं
स्वरूपयोग्यत्वं विवक्षितमिति नाव्याप्तिः शब्दस्य कर्मणि व्याप्तिरिति वक्ष्यतीति ध्येयं साधारणत्वात् साधा
रणत्वात् आधारणकारणत्वात्कार्यमात्रजनकत्वादिति यावत् अपरत्वस्य त्वनुभवविभागाभावात् बुद्धि २६
रपीत्यु विशब्दार्थे नत्वन्वय इत्यत आह पूर्वेति यथा परत्वं द्विविधं द्विविधं तथा बुद्धिरपीत्यर्थः मूले स्मृतिविभाग
कथनं न्यूनतां परिहरति अनुभवेन अन्यवदिति बुद्ध्यनुभवयोर्द्वैविध्यसमुच्चयार्थ इति अत्र यत्नावान्तरवि
भागकारणैवीजमाह यमेति स्वीकराह न्यायेन यमाविभागत्यागसंपातिनिभावः इदमपि शिष्यजिज्ञासा
वशादनुनियमतः कादाचित्कोपपत्तिर्नशिष्यजिज्ञासायामप्रमाविभागस्यापि वाच्यत्वेन वितत्वादिति द्रष्ट
व्यं अयमितिशब्दप्रमप्रमायाव्यक्तिकयोः सत्त्वात् प्रमाद्विविधोपपत्तिमाशंक्याहोपामतीति ननु प्रमाप्रकरणे करण
रां विभागेऽयुक्त इत्याशंक्याह प्रत्यक्षप्रमामिति तथा च मौलिकं प्रत्यक्षपदं प्रत्यक्षपरामित्यर्थः अप्रमारपेत्वतद्वैत्यादि द्वि
भागग्रंथविरोधं परिहरति नन्वित्यादीति नन्वसाधारणधर्मलक्षणमेवं सतीकथमीश्वरादिप्रमालक्षणमनद्भिम
त्वादत आह व्यावर्तकेति नचतत्राप्यन्ते कथं व्यावर्तकत्वमपक्षधर्मित्वादिति वाच्यं संबंधाविरोधस्यैव व्यावर्त्त

घातात्मकत्वं तु संयोगाभ्यामारब्धः पटोऽपि च तद्वदितिद्रष्टव्यमित्यादि· अपि च पाकिंघाय द्व्यधिकरणगुणज
न्यासात्तदुभयसमानाधिकरणगुणजन्यत्वेति व्याप्त्या आद्यादिपतनक्रियायां गुरुत्वेश्वरसंयोगासमवायिकार
णकायामपि विजातीयत्वं स्यात्· युक्तितौल्यान्तस्यापि समवायीकारणत्वमितिस्त विद्वन्तो वा व्याख्यायमाने तिलिखन
विरोधादीश्वरसंयोगासमवायिकारणत्वविवादस्यानुचितत्वात्· प्रकृते चाकरस्वकर्मसंयोगलक्षणव्याख्यानाव
सेरे विजातीयानेकासमवायिकारणकत्वस्यैकस्याविरुद्धमपि युक्तिवलादापाद्यमानेन विरोधमात्राद्धूयते त्यादिना
विरुद्धयोरप्यसमवायिकारणत्वाभिधानमितिसकलमकलंकं· त्रित्वाद्यवांतरभेदानामपि सत्त्वात्कथं त्रैविध्य
मतआह विभो चेत्यादयइति· अणुत्वादयः असत्वादयश्चाः भावप्रधानाः अणुत्वादिलक्षणधर्मपरास्यर्थः
अणुत्वादिद्रव्याणां अपरिमाणत्वादसंगतिर्यासानेत्यर्थः संयोगजविभागानुपपत्तिं शंकतेयद्यपीति· अन्यतरेति·
अन्यतरकर्मजउभयकर्मजः संयोगनश्चेत्यर्थः अन्यत्र· पृथक्त्वापादभाष्यादौ· अविभ्वशयादिति· इदं च फलोप
धानाभिप्रायेणसंयोगजननस्वरूपयोग्यतायाः कर्मत्वेनैवविवक्षितत्वात्· नन्वेवं विनश्यदवस्थसमवेतकर्म
णोऽपि संयोगजननतापत्तिः अग्निमक्षणसमवायिकारणत्वं च स्वरूपयोग्यत्वं विवक्षितं तूपसङ्काशेभा

वतायायुक्तत्वात्· नत्वाश्रयेतयोरपितदुपयोगः अतएवतएवपरस्परविशेषणत्वेऽपि अभावापन्नाइत्यादिक्वचनमाध्या
र्यालंकरणवल्लभांयुज्यतइति· व्यापन्नकल्पमेव विशदयतितेनेति· आप्तस्य पक्षेईश्वरस्य घ्राणत्वरसनत्वचक्षुःश्रो
त्रत्वत्वगत्व मनस्त्व· मनोऽसितानिलक्षणनियस्यवन्यापत्तमितिविग्रहः जन्यजनकेति· यद्वईंद्रियाणियेषांतानिपंडोद्रिया
णीत्यत्र षष्ठ्यर्थः संवंधोजन्यजनकभावइत्यर्थः करणविभागतया प्रतीयमानस्यापि प्रत्यक्षप्रमाविभागपरतयोक्तर्
व्याख्यानेवीजमाहातइति· ईश्वरादीति· नवेश्वरघ्राणरसनचक्षुःश्रोत्रत्वग्वना सीतिपाठेईश्वरसहितानिघ्रा
णमनांसियेषामितिविग्रहः अत्रयेषामितिषष्ठ्यर्थः संवंधोनपूर्ववज्जन्यजनकभावः इतरप्रमायाघ्राणादिजन्य
त्वेऽपीश्वरप्रमाया अजन्यत्वादतआह व्यावर्त्तकानिति· तथा च व्यावर्त्यव्यावर्त्तकभावरूपसंवंधः षष्ठ्यर्थइतिनानु
पपत्तिरितिभावः प्रकरणेति· प्रमाविभागकथनप्रसंगेत्यर्थः अतइति· यतः अत्यप्रमाविभागपरोयंग्रंथोऽनइत्यर्थः
अन्यथाघ्राणरूक्त्या पाताद्दित्याशयः एवं चेति· तत्र च इंद्रियाणीश्वरस्येत्यर्थः पृग्यार्थेऽधित्यार्थः प्रकरणंविरोधस्य
सर्वथादुष्परिहरत्वादितिभावः त्रिविधेतिपदसमभिव्याहृतोपमविः पूर्वान्तरयोस्त्रैविध्यसमुच्चयार्थ इत्याभा
तितद्वियुक्तं प्रत्यक्षस्यसत्त्वप्रधत्वोक्तेरतआहपूर्ववादेति· पूर्वान्तरयोरवांतरविधात्वसमुच्चयमात्रार्थकइत्यर्थः

त

वि

पूर्वपरामर्शिनस्तदोऽव्यवहितान्वयव्यतिरेकिमात्रपरामर्शकत्वभ्रमं निवारयति विधमपीति · ननु भ्रमाणां निरूप
णप्रस्तावे भ्रमाणामास निरूपणमसंगतमत स्तत्संगमयति नत्विति · नत्वनुमितिफलोपहितमेव लिंगत्वेनाभिमतं ·
तथा सिद्धादयस्तथा · असिद्धत्वज्ञानदशायामनुमित्यनुत्पादादत आह तत्रेति · असिद्धेत्यर्थः तथा च सर्वदानुमि २७
वि तिफलोपहितत्वमसिद्धमेवेति यदा कदाचित्फलोपहितत्वं वाच्यं · तथा सिद्धत्वास्फूर्तिदशायामसिद्धादिष्वपि स्त्येवे
त्याशयः एवं चेति · लिंगविभागव्याघातशंकानिवर्त्तकत्वं पतदित्यर्थः स्पष्टस्त्वेति · लिंगपरामर्शादिसामग्र्य
समवधाने विजायमानत्वादिति भावः बाह्येंद्रियाजन्यत्वमुपपादयितुमुपरतत्वमिंद्रियविशेषणं तदर्थं अनिर्वा
पारत्वं ज्ञानजनकसंयोगशून्यत्वमिति यावत् · असन्निकर्षेति · मनसोऽकृरिरस्वार्थं आदन्यथा मानमात्रोच्छेदादि
ति भावः विलक्षणेति · दोषदुष्टितात्ममनोयोगादित्यर्थः तत्स्वप्नज्ञानं · विभाजे पीत्यनंतरं न्यूनत्वं त्वनुषंगेण सं
बद्धा यानुसारेणायोजयितितर्कइति · यथासंभवं यथायोग्यं · ननुपश्चाल्लिंगितार्थस्य सत्यत्वादित्फलत्वात्कथं
विपर्ययत्वं तकस्येत्यत आह यमाशयइति · आपादकोदावयथार्थत्वमुपपाद्यापादकोदावयथार्थत्वमुप
पादयति नवेति · वास्तवमिति · बाधस्वरूपासिद्धेः प्रसंगादिति भावः असत्यार्थत्वात् · विशेष्यावृत्तित्रिप्रकार

त्वात् · ननु धूमदर्शनैकयमेतत्कालावच्छेदेनैतस्मिन्निर्धूमत्वज्ञानमत आह आहार्येति · तथा चानाहार्यज्ञानस्येव विशे
षदर्शनानिवर्त्यत्वं नत्वाहार्यस्यापि विघ्नतारकस्थलेतथादर्शनादिति भावः अयं तर्कः विपर्ययात्मकोऽपि भवन्नयं तर्को
नानुमितिरूपः लिंगपरामर्शाद्यभावेऽपि जायमानत्वात् · नाप्यध्यक्षः विशेषणीभूतनिर्धूमत्वादींद्रियसंनिकर्षा
भावादत आह नवेति · जन्यप्रत्यक्षभ्रमायामेव विशेषणेंद्रियसन्निकर्षापेक्षाः अप्रमायां तु दोषादसन्निकृष्ट
मेव विशेषणीभूय भासते · अतएवेदं रजतमित्यादिभ्रमोपपत्तिरित्यर्थः नन्विदं रजतमित्यादिस्थलेऽपि ज्ञानरू
पसन्निकर्षस्य सत्वात्तत्वाघवाजन्यप्रत्यक्षत्वावच्छेदेनैव तत्सन्निकर्षस्य हेतुत्वादत आह तथात्वेवेति · प्रकृतेऽपि
ज्ञानप्रत्यासत्तेरक्षततादिति भावः समुदायेन तर्कस्य भयोर्मिलितत्वात् · व्यस्य · संशयविपर्ययोर्मितस्य परिसमा
प्तिरन्वयो न नु तर्कः संशयस्वरूपो विपर्ययरूपो वेति चेत्येक मित्यर्थः गजस्करगोवेति स्वप्नानुभवानुपपत्तिरिति
भावः सन्निकृष्टेमेति · ज्ञानप्रत्यासत्तेतिशेषः तदुभयेति · संशयविपर्ययोभयात्मकस्वप्नजननसंभवात्पृथक्त्वेनस्वा
मग्या उपपादितत्वाच्चेति नरुक्तापात इति ध्येयं · मुख्यं मतमाह वस्तुतइति · अन्यत्र · तर्कभावायामित्यर्थः दोषै
रितिकरणतृतीया निर्देशेन्वेति · यथान्यासं यथानुपूर्वीकं अत्रापि तर्कः संशयः स्वप्नसंशयविपर्ययावेति

न·टी·प·टी

समुदायेपरिसमाप्तिसंशयस्वप्नस्य विपर्ययात्मकत्वमात्रस्पष्टत्वंग्रंथकृदभिमतत्वेमानाभावादितिध्येयं· ननु
निःप्रकारके प्रकारकघटितंकथंप्रमात्वाद्विरोधादतआह यायुक्तेति· विशेष्यावृत्यप्रकारकत्वांभावांते:सक
रूपायात्रित्यर्थः इदंपघवियल्किंविदूज्ञान विशेष्यावृत्यप्रकारकत्वविवक्षायामसंभवः घटत्वादेरपिपटज्ञानविशे २८
ष्यपटेऽवृत्तितयाविशेष्यावृत्यप्रकारकत्वाभावात्· सकलज्ञानविशे[illegible]स्यामप्रसिद्धिः सकलज्ञा
नविशेष्यस्यैकस्याभावात्· सकलानियानिज्ञानानितेषांप्रत्येकंयानिविशेष्याणितदवृत्तिविवक्षायांरजता
दिज्ञानस्यापिसकलज्ञानप्रविष्टतयातद्विशेष्येऽवृत्तित्वाभावादप्रसिद्धिः प्रकृतज्ञानविशेष्यादिविव
क्षायांचनिर्विकल्पकासंग्रहः प्रकारसमानियतविशेष्यस्यतत्राभावात्· अभावद्वयाघटितैतत्प्रमालक्षणे
ष्कपगमेगौरवंचेतीदमयुक्तंतथापिसर्वमतेप्रमानैकाकिंतुघटाद्यन्यप्रकारकंज्ञानंघटप्रमा· एवंपटप्र
मापिलक्षणीया· विशेष्यावृत्यप्रकारकत्वमितितुलिखनंबालबोधनायशब्दानुगममात्रंनतुवैयर्थ्यमनुग
तः अतएवतद्वतितत्प्रकारकत्वामन्यत्रापिघटत्ववतिघटत्वप्रकारकत्वमेवार्थं इत्यालोककारादयइति
निर्विकल्पकग्रहइतिध्येयं· आकारःस्वरूपं· स्पष्टमेवेति· अप्रामाण्यशंकाविरहकालीनतत्संशया

विरोधित्वादितिभावः पूर्वस्य· ऊहस्य· एककोटिकत्वादिकपलक्षणं· संशयभिन्नत्वोहादिव्यवहारविषयत्वा
दित्यपिद्रष्टव्यं· अपरस्य· अनध्यवसायस्य· यद्यपिमूलकारमतेएककोटिकज्ञानामपिसंशयोभवत्येवत्वनेकको
टिकत्वमनावश्यकंतथापिघनेककोटिकत्वमेव संशयइतिपूर्वपक्ष्याग्रहः उत्कटेति· तथाचप्रापद्दितविशेष
णमहिम्नाद्वितीयाकोटिर्भासतएव· हस्तिकोटिस्तूत्कटतयातत्रोत्कटत्वंपरिसपर्व· अनध्यवसायस्यसंश
यांतर्भावेहेतुमाहवक्ष्यमाणेनि· व्यवहारभेदस्यजनिमाहऊहसंभावनेति· यद्वायदिसंज्ञाभेदादूहसंशय
योर्भेदस्तदासंभावनात्वमप्यधिकंज्ञानंस्यादित्यावापेनाहोहसंभावनेति· दुःखान्यस्यदुःखकारणमात्रज
न्यत्वाद्दुःखकारणमात्रप्रभवत्वंत्वसमुच्चयोपिनानसंभवतीत्याशंकायामादौकस्यविसमाधानमाहदुःखे
ति· तदावांतरविभागकरणे· तदेतद्दूषयतिकिंत्विति· अन्यथासुखकारणानामानंत्वेनसुखकारणमात्र
प्रभवमोक्षमित्याद्यपिसर्वत्राविशेषणंस्यादितिभावः अभिप्रायांतरमेवप्रकटयतितदुच्यतइति· शरीरस्य
स्वीयगुणतयादुःखकारणमात्रत्वंतस्यासिद्धमतआहननुसुखेति· साधनस्यापिधर्मादेः कृतिसाध्यतया
द्वैविध्यानुपपत्तिराहसुखेति· समाहाररूपत्वस्यावयविनिष्ठगुरुत्वेपिसत्वात्तदियंदि द्विभागानुपपत्तिरत

भा·टी·प·

आह चकारेणेति · ननु स्वाभाविकत्वं स्वभावजन्यत्वं परमाणुस्नेहे कथं तत्साधनमाह साक्षादिति · अतएवे
ति · कर्मरिक्तादितिकर्म विहितयवुल्प्रत्ययस्य कर्मार्थत्वे विरोधादित्यर्थः अन्यथाऽनुभवे तद्विरोधादित्यन्ये · अवर्णा
त्मकत्वं वर्णात्मकशब्दभिन्नत्वं न च घटादिसाधारणमतो व्याचष्टे ध्वनिरितीति · ध्वनित्वं च गंगाघोषादिनिष्ठा शब्द २८
त्वव्याप्यजातिः वर्णत्वं च कत्वगत्वादिव्यापिका शब्दत्वव्याप्यजातिरिति विवेकः यत्तु यत्र कोलाहले न वर्णात्मकत्व
मनेन तत्र वर्णाभिन्नत्वाभावाद्व्याप्तेः ध्वनिरितिइति तत्तु तिलानिरूप्योपेक्षणीयं · अविदितकत्वगत्वादिककारादित्वि
मेवेतिचेत् न · घंटाघोषादिसंग्रहाय जातिरेव तत्र इतिचेत् · तर्हि कत्वव्याप्यं व्याप्यं व्यापकं वा गंगाघोषादावपि ध्व
नित्वस्य विद्यमानतया व्याप्यत्वाभावात् · स्पष्टककारे ध्वनित्वपरिहारे एकत्वविद्यमानतया व्यापकत्वस्याप्यभा
वात् · तथा च जातिसंकरप्रसंगात् युक्तमेव रमणीयमिति दिक् · अतइति · अतएकपदेन सह कर्मधारयोऽ
तो बहुव्रीहौ सर्वनामसंख्ययोः उपसंख्यानमिति वा व्यवस्थानेन उपसर्जनसंख्यापूर्वनिपातइत्याशयः अद्वृत्तः
उतीयमानं विरोधं विमुख्य विरोधस्थ्याप्य परिहरति तत्रेति · पृथिव्यन्येति · पृथिव्यन्ये परमाणवः आप्याः तैजसा ज
वायवीयपरमाणवस्ते पुनर्नित्याः तदितरे त्रिविधपरमाणवितरे सकलाः पृथिवी आप्यादिका पीलिताश्च नित्याः

पूर्ववदिति · आप्यपरमाणुगतं नित्यं कार्यजलगतमनित्यमित्यर्थः द्व्यणुके · समूहे · अनेकमिति · उत्पन्नगाञ्चिह्नितं
नित्यकोदासीनरूपं · अपेक्षेपणं विहितनिषिद्धोदासीनरूपमित्येवं प्रकारेणेत्यर्थः ननु शब्दपरत्वे विषयपदानन्व
यः ज्ञानस्यैव सविषयत्वमिति सिद्धान्तादत आह तेनेति · विहितादिशब्दाः शब्दार्थपरत्वे आख्यानबीजमाह कर्मेति · तथाहि
निरूढद्वितसमासेभ्य इति पंचमी तथा च निरूढद्वितसमासेभ्यो यो भावप्रत्ययस्तेन संबंधाभिधानमित्यर्थः नानेकेति ·
· यद्यपि स्वरूपसंबंधेनत्वन्निमतः समवायस्य समवेतत्वमस्त्येव समवायस्वरूपस्यैव संबंधत्वादन्यथापि संबंधिभिन्न
संबंधेन समवेतत्वं नास्तीत्यभिप्रायः तत्र · दंडित्वादि · नित्यत्वपक्षोक्तदोषोद्धाराय शंकते नित्यस्यापीति · अनेकोपी
दंडसंबंधस्यादभावादित्यर्थः ननु दंडित्वस्य नित्यत्वेनात्कपाधिये व्यत्याभावस्य दोषः उभयोरपि नित्यानेकसम
वेतत्वादत आह नित्येति · अत्र भेदादिनामिवाधकसत्त्वे उपाधिरूपत्वं तदभावे जातित्वमित्यर्थः उक्तव्यवस्थायां मूर्तत्वे न
न्ययमाह वक्ष्यमाणेति · परस्परसामानाधिकरण्ये सति परस्परपरिहारस्थितिकत्वं सांकर्यं न च पाठकत्वादि परस्पर
परिहारस्थितीत्यर्थः त्रिविधस्य जातित्वं दर्शयितुं विविच्य मूलं योजयति तत्रेति · देवदत्तत्वादीत्यादिना घटत्वादि
पर्यंतः जात्युदाहरणसमभिव्याहारात्तरोपः धूमोदाहरणे धर्मं च पाकत्वं माहात्म्यपरापरोपाधेरिति · एवं द्व्यक्ति

त

श्यामत्वस्यैतत्कालीनत्वमपहाय ह्यस्तनघटादावपि सत्त्वादेतत्कालीनत्वस्यैतद्व्यक्तिविशेषत्वमपहाय घटान्तरे
ऽपि सत्त्वात्स्ववृत्तिसामान्यविभाजकोपाधिमदन्यवृत्तित्वरूपं तत्स्य प्रत्येकमसत्त्वाद्विशिष्टमाह एतत्कालीनेति·
तमोद्रव्यं नीलरूपवत्त्वात्कर्मवत्त्वाच्च तस्य रूपाश्रितत्वशंकां परिहरति· अनुभवेति· अतिरिक्तद्रव्यत्वमंधकारस्य ३
साधयितुं परिशेषमाह द्रव्यमपीति· स्पष्टमेवेति· मूर्त्तत्वादित्याशयः· अभयवादीति· मममुख्यतया मीमांसकस्य
त्वंधकारव्यंजकतया संप्रतिपन्न इत्यर्थः· उपपन्ने· अंधकारप्रतीतेरिति शेषः· वैपरीत्यस्य· आलोकस्यांधकारा
भावत्वस्येत्यर्थः· आदिना भास्वररूपपरिग्रहः· नन्वालोकाभावात्मकत्वेन भास्वद्रूपादिप्रतीतेः का गतिरत आह
रूपादीति· अयमाशयः· कश्चित्प्रमितं कुत्रचिदारोप्यते नेन पृथिवीनिष्ठनीलरूपारोपः संभवति तेजस्तमोभावत्वे
तु किं समवेतं उपलक्षणादि तेजस्यारोप्येत आरोप्यप्रसिद्ध्या वारोपायोगादिति· ॥· अत्र नव्याः· नीलं तम इति
प्रतीतिर्भ्रमित्वमयुक्तं प्रमात्वबाधकाभावात्· अन्यथा भ्रममात्रपरिशेषापत्तेः तथा च जगदनिर्वचनीयतावा
दिभिर्वेदांतिभिः न च तमसो नीलरूपाश्रयत्वे उद्भूतस्पर्शापत्तिः उद्भूतनीलरूपवत उद्भूतस्पर्शवत्त्वनियमादिति
वाच्यं उद्भूतरूपजनकादृष्टसद्भावेनोद्भूतनीलरूपवत्त्वेप्युद्भूतस्पर्शजनकादृष्टाभावान्नोद्भूतस्पर्शः न ह्युद्भूतरूपोद्भवः

स्पर्शोद्भवे प्रयोजकः किंत्वदृष्टमेव तदुक्तं अदृष्टभेदसंसर्गादित्यादि· अन्यथा लाघवादुद्भूतरूपाश्रयस्योद्भूतस्प
र्शवत्त्वनियमाभ्युपगमे प्रभादावपि तदापत्तिः उद्भूतस्पर्शवत्त्वेनोद्भूतरूपवत्त्वस्य वायावपि तदापत्तेः किं च यथाश्रुनदंडनी
लप्रभासहचरितनीलभोगे व्यभिचारात्· अतएव प्रत्नीलरूपप्रयोजकादृष्टसमवधाने तत्र स्पर्शोद्भवादृष्ट
प्रयोजकासमवधानमिति नियमात्तददृष्टमप्यवर्जनीयसमवधानमिति निरस्तं· अदृष्टं हि भोगैककल्प्यं तथा च
नीलरूपसाक्षात्कारजन्यभोगस्य विद्यमानतया तदुद्भवप्रयोजकादृष्टसद्भावेप्युद्भूतस्पर्शजन्यसाक्षात्का
रजन्यभोगाभावेनादृष्टसद्भावे प्रमाणाभावात्· न च स भोगोप्यापाद्यः आपादकाभावात्· न चादृष्टमेव तत्
६ दापादकं परस्पराश्रयात्· अदृष्टसंपत्तौ भोगसंपत्तिः भोगसंपत्तौ चादृष्टसंपत्तिरिति· तस्मात्तमसि स्पर्शा
भावेपि न नीलरूपानुपपत्तिः· अपि च स्पर्शशून्यतमसो न तावदनारब्धत्वमेव· उत्पत्तिविनाशप्रत्ययानुपप
त्तेः नाप्यारब्धत्वं· तदवयवानां स्पर्शवत्त्वे स्पर्शवदवयवारब्धत्वेन तमसोपि स्पर्शापत्तिः अस्पर्शवत्त्वे च कथं
तेषामारंभकता स्पर्शवत्त्वस्य द्रव्यसमवायिकारणतावच्छेदकतया तदभावे तदयोगादिति चेन्न· मैवं· नाना
वनुस्यूतवृत्तित्वं द्रव्यसमवायिकारणतावच्छेदकं घटस्यापि द्रव्यसमवायिकारणतापत्तेः नाप्यंत्यावयविभि

सा.टी.प.टी.

त्वे सति स्पर्शवत्वं । अंत्यावयवित्वस्यानिरूपणात् । द्रव्यानारंभकत्वे सति कार्यद्रव्यत्वमेव तत्वमिति चेन्न । कि
मद्रव्यानारंभकत्वं । न तावज्जनकत्वसामान्याभावः दंडादेर्घटजनकतयांत्यावयवित्वानापत्तेः । नापि समवा ३१
यिकारणत्वाभावस्तत्वं । तथा सति परस्पराश्रयः स्यात् । तथा हि समवायिकारणताग्रहानंतरं तदभावग्रहे
सति तद्घटितांत्यावयवित्वे सति स्पर्शवत्वं यावत्वं तद्ग्रहे च सति समवायिकारणत्वग्रहः । अवच्छेदस्य चान्य
देऽवच्छेदकधर्मज्ञानस्य कारणत्वात् । न चात्ममात्रसमवायिकारणत्वोपस्थितौ न ह्यतिरेकः सुग्रह इति
वाच्यं । समवायिकारणसाध्यकव्याप्तिनिश्चयं विना साध्यानिश्चयेऽनुमानाप्रवृत्तेः । तत्साध्यकानुमा
नेऽकृत्रिमदादिसाध्यप्रत्यक्षस्यावश्यकत्वात् । अन्यथा द्रव्यसमवायिकारणताभिन्नभिन्नत्वमात्रेणैव स
कलातिप्रसंगभंगे स्पर्शवत्वोपादानं अफलं । आत्माश्रयानंतरमात्रस्य प्रयोजकत्वमिति यदि तदानद्
घटितपाधावपितुल्यं । अथ जनकस्पर्शवत्वं द्रव्यसमवायिकारणतावच्छेदकमिति चेन्न । घटस्पर्शस्या
पि स्वमासारज्जनकतया घटस्यापि तत्वापत्तेः जनकत्वमिह समवायिकारणत्वं विवक्षितमिति चेन्न । अ
समवायिकारणत्वस्य घटितत्वेन तद्ज्ञानाधीनज्ञानतया तद्ज्ञानस्य चावच्छेदकज्ञानजन्यतया परस्परा

श्र

श्रयात् । अथ स्पर्शोत्पादकस्पर्शवत्वं समवायिकारणतावच्छेदकं चैतेन समवायिकारणत्वघटितत्वं वांत्या
वयविघटितं साधारण्यं घटस्पर्शस्य स्वसाक्षात्कारजनकत्वेऽपि स्पर्शोत्पत्त्यजनकत्वादिति चेत् । मैवं । स्पर्शोत्पादकताव
च्छेदकं स्पर्शनिष्ठं तत्तावत् स्पर्शत्वमेव । अजनकांत्यावयविस्पर्शवृत्तित्वेनातिप्रसंगात्तदनिद्रव्यसमवायिकारण
वृत्तिस्पर्शत्वमेव तथा वाच्यं तथा च परस्पराश्रयतादवस्थ्यैव । तत्किं द्रव्यसमवायिकारणतावच्छेदकमनुगतमिति
चेत् । न किंचित् । एतदेवांत्यावयविलक्षणव्याख्यानावसरे वस्तुतस्तत्तद्द्रव्यसमवायिकारणतावच्छेदकान्यत
न्निविष्टानि तंतुत्वादिद्रव्यसमवायिकारणतावच्छेदकत्वेनानुगतीकृत्य तदत्यंताभावस्त्वलक्षणं वाच्यः । अन्य
था स्पर्शवदंत्यावयवित्वस्यैव सामान्यतो द्रव्यसमवायिकारणतावच्छेदकस्याभिधानेऽन्योन्याश्रयप्रसंगादि
ति वक्ष्यति । यत्तु नव्याः संयोगासमवायितावच्छेदकतया पृथिवीत्वजातिसिद्धिर्यथा वा सुखादिसमवायितावच्छे
दकतयाऽऽत्मत्वादिजातिसिद्धिस्तथा द्रव्यसमवायिकारणतावच्छेदकतयाऽवयवत्वं जातिरेव स्वीकर्तव्या । ननु
पृथिवीत्वादिना सह संकरात्कथमवयवत्वं जातिः । तथा हि । अवयवत्वं त्यक्त्वा पृथिवीत्वमपहाय जले । पृथिवीत्वं
चावयवत्वमपहायांत्यावयविनि । तदुभयं चांत्यादावयवेऽस्तीति चेत् । उच्यते हि पृथिवीत्वस्य जातित्वं । अवय

त

स द्र·व्य·

वत्वेन सह संकरात् · विनिगमकाभावात् · यदि च सति संभवेऽवच्छेदकतालघुधर्मे एवेति नियमः समवायितावच्छेदकं
पृथिवीत्वं जातिः रूपितदाद्रव्यसमवायितावच्छेदकेऽवयवत्वेऽपि समानमन्यत्राभिनिवेशात् तत्किं जातिसंकरो नैव
दूषणं कः संदेहः संकीर्णयोरुपाध्योः पृथिवीत्वाद्योर्जात्योरपि संभवात् · अत एव ममममीमांसकस्य केदल्लस्तन्वनुभव २२
बयोः समाविष्टयोरेकधर्मभिन्नावृत्तिकयोः स्मृतित्वानुभवत्वयोर्जातित्वमिति सिद्धान्तसारः यथा च जातिसंकरस्या
दूषणत्वं तथा रुचिदत्तोपाध्यायैरेव प्रत्यक्षमणिप्रकाशे समाहितमिति नात्र समासि यत्यते बालानामनुग्रहात् · अ
स्तु वा पृथिवीत्वादिव्याप्यं नानावयवत्वं क्रियादिसमवायितावच्छेदकं अवयवत्वं सति संभवे त्यागायोगात् · इदं द्रव्य
समवायिकारणमिदं द्रव्यसमवायिकारणमित्याद्यनुगतव्यवहारस्तु द्रव्यनिष्ठकार्यतानिरूपितसमवायिता
वच्छेदकतयाऽनुगतीकृताभिस्तत्तदवयवत्वजातिभिरेव भविष्यतीति न दोषलेशावकाशोऽपि · सत्तायां सा
क्षात्कारप्रतिबंधकतावच्छेदकतयानुगतीकृतकत्वगत्वादिव्याप्यैर्नानाजातिभिरेव नानाकारानुगतमतिरिति
· एतदेवाभिप्रायं शिरोमणिभट्टाचार्यैरभिहितं द्रव्यसमवायितावच्छेदकतया मूर्तत्वं जातिः अतीन्द्रियानेकस्पर्श
कल्पनामपेक्ष्य लाघवादित्यादिरहस्यं · अपि च धर्मिग्राहकप्रमाणबाधादपि नायं विकल्पावसरः तथा हि

नावयवावयविधारासिद्धा स्यादाश्रयासिद्धिः परिसिद्धास्तदानिः स्पर्शास्पर्शारंभकाः तदभ्युपगतानामेव धर्मित्वमिति चे
त् · न · अन्यतरसिद्धिं विना पक्षसंगात् अपि च मदभ्युपगमस्य प्रमाणेन च बाधः अप्रामाणिक एवाश्रयासिद्धिः प्रसक्तेति
दुरुत्तरं व्यसनं · अथ तमसो रूपवत्वेन चाक्षुषसाक्षात्कारविषयता न स्यात् · रूपगोचरलौकिकसाक्षात्कारे आ
लोकस्य हेतुत्वात् · न च नक्तं सोऽस्ति · मन्मते तु नीलं तम इत्यस्य स्पर्शमाणरोपतयात्रालोकानपेक्षणादिति चेन्नै
वं · तथा सति तेजसोऽपि चाक्षुषसाक्षात्कारविषयता न स्यात् · तेजोग्रहे तदनपेक्षणात् · तथैव तवासिद्धान्तात् · अपेक्ष
णे वाऽनवस्फुलिंगाक्षरेणुसाक्षात्कारो न स्यात् · तस्यापि तेजोभावत्वात् तदं · आलोके प्यनुपलब्धिसत्वे विषयासिद्धेः वि
५ षयसत्वेऽपि योग्यानुपलब्धेरभावात् · तदाहुराचार्याः यद्ग्रहे यदपेक्षं चक्षुस्तद्भावग्रहेऽपि तदपेक्षत इति · न चे
ष्टापत्तिः अनुभवविरोधात् · तेजोव्यतिरिक्तभावगोचरलौकिकसाक्षात्कारे तदपेक्षेति चेत् · तुल्यमितर
त्रापि · न वा स्पर्शाभ्यथानुपपत्त्या तेजसोऽद्रव्यत्वसिद्धौ युक्तं तद्भिन्नत्वं विशेषणं · न च तमस्यन्यथासिद्ध
चाक्षुषरः कोऽपि द्रव्यत्वसाधको गुणः अनीयते प्रतीयमाननीलगुणस्य चारोप्यतया पक्षापन्नेस्तथा च किमर्थं सा
मान्यव्याप्तिसंकोचहतिवार्यं · अन्योन्याश्रयात् · नीलं तम इति प्रतीतेर्भ्रमत्वसिद्धौ तेजोव्यतिरिक्तभावगोच

रलौकिकवासुषसाक्षात्कारविषयसंस्कारकालोकयोः कार्यकारणभावसिद्धौ सामान्यव्याप्तिसिद्धिस्तद्व्याप्ति
सिद्धौ वास्य प्रमलसिद्धिरिति· अपिचपाकजन्यतयासिद्धगुणेद्रव्यत्वसाधकत्वेऽपिवायुरपिपृथिवीभिन्नोनसिद्ध्ये
त्· अनुष्णाशीतस्पर्शस्य पृथिवीसमवेततयाऽसाधारण्याभावात्· अपाकजानुष्णाशीतस्पर्शत्वस्यसाधकः
स्वान्यथासिद्ध एवेतिचेत् न· अपाकजनीलरूपवत्वेनानन्यथासिद्धेनतमसोऽद्रव्यत्वमितिपक्ष्यापिसमा
नत्वात्· नीलरूपस्यापाकजत्वेमानाभावइतिचेत् तर्हिकिंवायुस्पर्शस्यापाकजत्वेमानं अयः कृतिसिद्धमितिवक्त
मुचितोसि· नवरूपादिकं पर्जनकतयातदतिरिक्तत्वासिद्धाविति वाच्यं पृथ्वीत्वेपितद्व्यक्तेः मार्तण्डघर्मघृणि
नमद्भारूपादिकंयस्यानुभवसिद्धत्वात्· एवंसतिसुरभिः समीरणइत्यादिप्रत्ययानामपिसाक्षात्संबंधेन
प्रमात्वं संगच्छते· अपिचैवमाकाशोप्यावरकद्रव्याभावएवास्तु· कस्तर्हि शब्दाश्रयः ईश्वरएवेतिरुद्राणःसर्वं
वैतन्नूनमेवोपपादितमितिनात्रलिख्यते· किंचैवंविधिरूपत्वप्रवेधप्रवृतमोघ्यप्रभावांतरानिंद्रनिरूपित
दानमोद्रव्येपिवालोकाभावप्रतीत्यपपत्तौसोप्यतिरिक्तोनस्यात्· यदिवोपकारसमयेइहतेजोनेतिप्र
तीतेर्निषेधरूपायाः सत्वात्तदातिरिक्तंतदानीतंतमोगच्छतीतिविधिमुखप्रतीतेः प्रकृतेपितुल्यं· तथाच

भयोः समनियतत्वेपितान्यतरेणान्यतरासिद्धिः तस्मादेवंतमसोद्रव्यत्ववादिमीमांसकमतेपरिशुद्धेवैशेषि
काणांतमसस्तेजोभावत्वाभिधानंस्वाग्रहग्रथ्यव्यामोहनमात्रमितिदिक्· ॥ ॥ इदंमत्कल्पनंमानेरपसिद्धां
तदूषितं । हंतवायुक्तिसहत्वात्संतोषुकामिनाषिणः १ ॥ ननुयादृशादेवकरतलानलसंयोगाद्धहोज
यतेतादृशादेवतस्मान्मणिसमवधानेदाहोनजायतइतिसकलानुभवसिद्धतयामणेर्दाह· प्रतिबंधक
त्वमेष्टव्यं प्रतिबंधकत्वंचकार्यानुकूलंकिंचिद्धर्मविघटकत्वमेवतत्रैवसर्वाभिज्ञोजनव्यवहारात्।अ
७ तोमणिविघटनीयंदाहानुकूलंवह्निसमवेतंकिंचिदतीन्द्रियंस्वीकर्तव्यं। तदेवसहजशक्तिरिताभिधीयते
॥नचान्यदेवदाहानुकूलंमणिना विघट्यतांकिंशक्त्यातिरिक्तपदार्थकल्पनागौरवप्रसंगादितिवाच्यं·
नत्किंदृष्टमुष्णस्पर्शादिकमदृष्टंवा·उभयमपिनसंभवतिउष्णस्पर्शस्यमणिसमवधानकाले· विपुरुषांतरैरु
पलभ्यमानत्वात्। कर्मनाशाजलस्पर्शवदप्रतिविद्धतयाविहितादृष्टनाशकत्वानुपपत्तेः। धर्मभिन्न
तयाचप्रतिषिद्धादृष्टनाशकत्वस्याप्यनुपपत्तेरितिमनसिनिधायमीमांसकः शंकतेननुमण्यादीनि।
मंत्रादिनामंत्रोपध्योः परिग्रहः। सतिसप्तमीद्धवचनंचेदंअसमवधानयोरिति। अस्यायमाशयः।

२ सटी·पद

मण्युपसर्पणेतावद्दाहोजायतइत्यविवादं तत्रमण्यपसर्पणेकिंकृतमितिविवेचनीयं । नतावद्दृष्टं
दाहानुकूलमुष्णस्पर्शादि । तस्यानैः आगध्युपलभ्यमानत्वात् । नाप्यदृष्टं विहितप्रतिषिद्धत्वाभावात् ।
नचाव मण्युपसर्पणेऽदृष्टोत्पादकं किंचिदस्ति इत्यंगीकर्तव्यमितिममप्रतिभाति । असमवधानग्रहणेन मु २४
ज्याधिकरणविरहवः । वैलक्षण्यानुपपत्तेरित्युपलक्षणं साङ्कर्यानुपपत्तेरित्यपि बोध्यं तेन समवधाना
समवधानयोरेकत्रस्थितेनासंगतिः । अभ्युपेत्याप्याह सत्यपीति । अप्रतिबद्धतया । अविरोधितया
। दृष्टसकलकारणसंपन्नोऽसन्त्यामदृष्टव्यतिरेकेणकार्यव्यतिरेकाभावादन्यथान्यत्वं तत्तु संयो
जत्वकदाचिदप्यनुत्पादप्रसंगात् ॥ अन्वयश्चेत् ॥ एवं सत्यदृष्टस्यकारणत्वस्यमानाभावः । स्वी
तंत्र्येणतदन्वयव्यतिरेकयोरभावात् ॥ अथयत्साक्षात्कारणं तद्व्यतिरेकएवकार्यव्यतिरेकप्रयोजकः
अदृष्टं वन साक्षात्कारणं किंतु दृष्टसंपादक नचात्रतत्त्वस्वर्गेशरीरादिकन्यूनमितिचेत् । मैवं । परं परा
कारणत्वस्याविशेषात् विलसाक्षात्कारणमात्रनियततया दृष्टसंपादकत्वात् यादृष्टहेतुत्वनियमासिद्धेः
सत्यपिपरमाणुकर्मणि प्रथमांतरप्रलयेसंयोगानुत्पत्तेर्दृष्टसकलकारणप्रतिबंधाद्दृष्टस्यापि सत्वाच्च प्रथ

वयेत्यादिविपक्षबाधकं तदप्यापाततः कार्यानुपपत्तेरेवतत्रमानत्वात् । कार्यत्वेनेयधर्माणि । थाकार्यमु
न्वयानात् · नत्वेवंप्रकृतेदाहोयेनतदनुपपत्तिरदृष्टसाधिकास्यात् · तस्माददृष्टविलंबादेवकार्यविलंबस्य
संभवाद्बलंशाक्येति । तत्र । अस्फुटतावदन्यत्रयथातथानथापिनपक्षेतदृष्टव्यतिरेकः संपादितः अग्नेर्दाहानुप व ३
पत्तेः नचमण्युपसर्पणेनादृष्टांतरमुत्पाद्यतइतिवाच्यं · तस्यविहितप्रतिषिद्धेतरत्वात् · यद्वासत्यपिपरमाणुक
र्मणीत्याद्यदृष्टस्यसाक्षात्कारणतासाधकमुक्तंतद्यपितदादृष्टसत्वादेवानुपपन्नं · अन्यथाग्रेपिकार्यं न स्यादनु
नहितदादृष्टोत्पत्तिः तदादन्यद्रव्यमात्रविनाशेनादृष्टोत्पादकयागादेरभावाद्वियत्रविलंबः । घातनियते
ति ॥ यादृशमितानाऽदृष्टव्यतिरेकः संपादितस्तदाऽदृष्टत्वाविशेषात्सर्वपुरुषीयादृष्टं नाश्येतद्याचकस्यविद्यह न
: कस्यचिद्दाहइतिनस्यात् · शक्तौतुधर्मिग्राहकमानसिद्धायांनेयमनुपपत्तिः यथाकार्यं तस्याः कल्पनात्
· नदुक्तंपद्मनाभेन कणादरहस्य · प्रतिनियतपुरुषीयदाहानुकूलशक्तेरेव निराकरणादितिहिनिभावः ।
अनुग्राहकं । अवच्छेदकं ननुसहकारिअपासिद्धांतात् · शक्तत्वेनतत्तत्कारणत्वात् । उन्नीयतइत्यर्थापि
त्यनुमानसाधारणशब्दं प्रयुंजना शक्तावनुमानमपिसूचितं तद्वोध्यं अयंवह्निर्दाहानुकूलातीन्द्रियाद्दृष्ट

स्प·ट

धर्म्मसमवायीदाहकारणत्वात्· आत्मवदिति· अत्राप्यायमिति विशेषणं· पायुक्तो वह्निः पक्षस्तेन वह्नि
घाणुकादावर्तीन्द्रियस्पर्शेन नसिद्धसाधनता· वह्नित्वसमवायितया सिद्धसाधनतामापादयितुं मतीन्द्रियेति । वु
द्धौ स्थितस्थापकतापक्षेतत्समवायितया सिद्धसाधनव्यावृत्त्यै दाहानुकूलेति अन्यथा तु द्वेषपाहिध्यर्थंन
दितिध्येयं । उष्णस्पर्शसमवायितया सिद्धसाधनतां परिहर्तुमतीन्द्रियेति· अदृष्टवदात्मसंयोगसमवायितया ३५
सिद्धसाधनतापरिहाराय द्रव्येति । नन्विदमयुक्तं । अदृष्टवदात्मसंयोगो हि वह्निना सहविवक्षितो दाहेन स
हवा नाद्यः । तस्य दाहाननुकूलतया दाहानुकूलपदेनैव वारणात् । व्यधिकरणं दृष्टवदात्मसंयोगस्य हेतु
त्वमानं भावात् । यत्क्रिया यदीय व्यधिकरणगुणानिमित्तका सा तदुभयसमानाधिकरणगुणजन्येति व्या
प्त्याहितस्य हेतुत्वं तद्वत्समानाधिकरणस्यैव तस्य । नांत्यः बाधादेव तेनार्थांतरतानवकाशात्· तथा वा द्वितीयम
दमनुपादेयमेवेति चेत् । मैवं । न हि दाहानुकूलत्वमन्यथासिद्ध्यादिघटितं किंतु तदवच्छेदकसाधारणं तय
न पूर्ववृत्तित्वं तच्चादाहकरणीभूतोष्णस्पर्शकारणे च हृद दृष्टवदात्मसंयोगेप्यस्त्येवेति न तद्वैयर्थ्यं । अतए
वानुकूलत्वं च कार्याभावव्याप्याभावप्रतियोगित्वं कारणत्वं तदवच्छेदकसाधारणं दृष्टं दंडत्वेन कारणत्वे संदृष्टत्वा
श्री

भावादपिकार्याभावदर्शनादिति गंगेशोपाध्यायाः संजगदिरे । यद्वा पार्थिवद्व्यणुकादि वह्निसंयोगसमवायितया
सिद्धसाधनतोद्धारार्थं तदुपादानात् । एतेनाद्विष्ठत्वव्यर्थं वह्न्यदृष्टवदात्मसंयोगस्य दाहाननुकूलत्वात्· नच
कार्येनान्तरेह्वदृष्टवदात्मसंयोगस्य कथं तु दाहानुफलयोर्विभूतया परस्परसंयोगासंभवादित्याशंक्य वह्नि
दाहानुकूलातीन्द्रियद्रव्यसमवायिन्यवेत्यन्त्येवतास्पर्शादिनिकरणादरहस्याक्रमप्यसमवायि ॥ तिवाच्यं· तथा सति द्वि
तीयक्षणे घटेन्रूपादयो नोत्पद्येरन्· किं बहुना सर्वथा घटेन्रूपादिकं नोत्पद्येत नादृष्टवदात्मसंयोगोहि घटकर्म गो ५
णो घातात्मनाविभूत्वात्· तदा तु मूर्त्तकार्यमिति तदपेक्षायामन्योन्याश्रयात्· नस्याद्वशब्दोत्पत्तिरात्माकाशसं
वत्तन्त्रीतातत्सार्थक्यात् । यदप्युक्तं द्वितीयक्षणे घटेन्रूपाद्यो न्यत्र घटेरन्निति तदप्यापाततः । मूर्त्तवृत्तिघल्कायंपदी वा
व्यधिकरणगुणजन्यं तन्नदुभयसमानाधिकरणगुणजन्यमिति व्याप्त्या तस्य कारणतासिद्धौ द्वितीयक्षणे घटेन्रूपानु
त्पादस्येष्टत्वात्· समयसौक्ष्म्यानाकलनाच्चावधानभ्रमः । अन्यथा घटतद्रूपयोः समानकालीनोत्पत्तिर्मीमांसकादि
मीमांसकमतं दुर्निवारं स्यात्· यद्विचपमाणासद्भकाराणा घटस्य पूर्वमसत्वान्नैककालोत्पत्तिकत्वं तदा प्रकृतेपि
समानं यान्च किं बहुनेत्यादितन्त्रुन्छुक्रमजतत्संगौ संभवेपि संयोगजसंयोगस्यसंभवात्· परमाणोवकर्म धारी यावि
रा

दी.प.द्वि.

धर्मात्त्वान्नानुपपत्तिः। एतेन शब्दाद्यनुत्पत्तिर्निरस्ता· मूर्त्तकार्यत्वावच्छिन्नं प्रतितद्धेतुत्वस्वीकारात्· अतएव मूर्त्तपदं
त भविनैव व्याप्तिरन्यथाभिहितेति दिक्। तन्मते भावस्यानुपलब्धतया तीन्द्रियत्वेन प्रतिबंधकाभावेनार्थांतरवारणाय
समवायीति। अदृष्टाद्यतीन्द्रियप्रतिबंधकाभाववत्त्वया वासिद्धसाधनता परिहाराय समवायीति। अयुतसिद्धसंबंधत्वे
न समवायप्रवेशान्मीमांसकमते समवायाप्रसिद्धिरयुक्त एव एतेनावकाशः। ननु किमतीन्द्रियत्वं न तावत्साक्षात्का ३६
राविषयत्वं· न्यायमते भगवत्साक्षात्कारविषयत्वस्य केवलान्वयितया विषयत्वस्याप्रसिद्धेः नापि जन्यसाक्षात्का
राविषयत्वं· न्यायनये योगिसाक्षात्कारविषयतया सर्वस्याप्रसिद्धेः। नाप्यस्मदादिसाक्षात्कारविषयत्वं· सामा
न्यलक्षणाजन्यसाक्षात्कारमादाय विषयत्वाप्रसिद्धेः। नाप्यनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्य
जन्यसाक्षात्काराविषयत्वमतीन्द्रियत्वं। मीमांसकमतेनादृशप्रत्यासत्तेरभावादप्रसिद्ध्यापत्तेः। यद्वापि साक्षा
त्कारनियामकप्रत्यासत्त्यनाश्रयत्वमतीन्द्रियत्वं (मीमांसक) साक्षात्कारनियानियामकाश्च संयोगादयः षट्
प्रत्यासत्त्यप्रसिद्धनाश्रयत्वं गगनादौ। नन्वचक्षुःसंयोगसत्त्वेपि तस्य साक्षात्कारजनकत्वाभावात् शा
धैरापाध्यायैरुक्तेऽस्य सम्यगेव। घटादिसाक्षात्कारजनकसंयोगाश्र— यावच्चक्षुरादेरतीन्द्रियत्वं —

त्· न च स्वविषयसाक्षात्कारनियामकप्रत्यासत्त्यनाश्रयत्वं तत्· अनाश्रयत्वं · · नेत्रत्वं चक्षोन सिद्ध्यसिद्धिव्या
घातइतिवाच्यं। न्यायमते सामान्यादिप्रत्यासत्त्याश्रयत्वस्य केवलान्वयितया तदनाश्रयत्वस्याप्रसिद्धेः। न च लौकिकत्वं
साक्षात्कारविशेषणं· मीमांसकमतेऽव्यावर्त्त्याप्रसिद्धेः। किंच साक्षात्कारनियामकत्वं। साक्षात्काररूपकलोपहि
तत्वं वा· तत्स्वरूपयोग्यत्वं वा· नाद्यः। अननुव्यवसितनष्टज्ञानादिसाधारण्यात्· नांत्यः परमाणावस्त्वयोग्यैः नेत्रस्यापि सा
क्षात्कारजननस्वरूपयोग्यसंयोगप्रत्यासत्तेः सत्वात्· न चैवं तत्साक्षात्कारः स्यादिति वाच्यं· महत्त्वादिरूपकारणांत
रवैकल्यादिति॥ उच्यते॥ विषयतया साक्षात्काराजनकत्वमतीन्द्रियत्वं· करणतयानुपादिसाक्षात्कार(स्वाद्यत)
जनकचक्षुराद्यव्यभिचारप्रयविषयतेपतिः यानि ज्ञानविषयाजन्यजनतायामुख्यमतत्वान्नकश्चित्· तथाचश्चा
क्तिः नेन्द्रियादिगुणादिवृत्तिवादिन्यर्थः। इत्यादियत्कारणंतेन्मान्नदोषइतिदिक्। एवं शक्तिं प्रसाध्य सप्रमाणं तभावं
साधयति तत्त्वेपि। द्रव्यादेर्यत्कारणं संयोगादृष्टादितत्र सर्वत्र विद्यमानत्वात्· तथाचशक्तिः नद्रव्यादिवृत्तित्वादि
त्यर्थः। इत्यादियत्कारणं तन्मात्रवृत्तित्वादित्यर्थ इति कश्चित्। पूर्वपक्षतात्पर्यमुपसंहरति कथमिति॥ ननु प्र
तिबंधकाभावः प्रागभावादिसाधारणः कारणांबन्धसवन्निधर्मः प्रागभावस्य प्रतियोगिसमवायिदेशमात्र

क्त्रित्वादत आह कारणत्वेनेति। कार्यानुकूलं किंचिद्धर्मविघटकत्वं पदार्थांतरकल्पनागौरवात्। किंतु कारणीभू
ताभावप्रतियोगित्वं तत्। अत एव तन्मणिकल्पे दाह। ननु प्रतिबंधकाभावस्य कारणत्वे सत्येतत्स्यात् तदेव कुत इति चेन्न
तत्किं प्रतिबंधकाभावः कारणमेव न भवतीत्युच्यते उत दाहं प्रति न कारणमिति वा। नाद्य इत्याह प्रतिबंधकेति। पुनरिति।
अन्यथा मणिसमवधानसमय एव शक्त्युत्पादेन दैवद्दाहापत्तेरिति भावः। न द्वितीय इत्याह रसौशपकत्वादिति। तथा
च तद्धेतोरवाक्कांकितेनेति न्यायात् प्रतिबंधकाभावो दाहं प्रत्यन्वजनकोस्त्विति किं शक्त्येति भावः। ननु मण्यभावस्य दा
हहेतुत्वं कथं मणेः प्रतिबंधकत्वं कार्यानुकूलविघटनरूपतया तद्विघटकत्वाभावात्। अविककारणतया भावत्व
व्याप्यतया कथमभावस्य हेतुत्वं व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात्। किं च प्रतिबंधकसत्वे प्युत्तेजक
काले दाहदर्शनान्न तस्य तद्धेतुत्वं व्यतिरेकव्यभिचारादत आह दोषमणमिति। समाधारपकारश्चेत्वेन मणेः प्रतिबं
धकत्वं किंतु तत्सपुरुषस्येव तदुक्तं प्रतिबंधोत्तसामग्रीतद्धेतुः प्रतिबंधक इति। यद्वा स्वार्थ एवायं क प्रत्ययः
तेन मणिः प्रतिबंधक इति। अयोगोपपत्तिः। वस्तुतस्तु कार्यानुकूलं किंचिद्धर्मविघटकत्व[illegible] विघटकपदार्थ
त्वे मणे शक्तिं प्रतिप्रतिबंधकता न स्यात्। शक्त्यनुकूलशक्त्यंतराभावात् [illegible] मणिनि शक्ति

प्रतिबंधक इति वाच्यं। तथा सति मण्यभावस्य तद्धेतुत्वं न स्यात्। न चेष्टापत्तिः [illegible] कारणत्वं
णीभूताभावप्रतियोगित्वमेव प्रतिबंधकपदसांकेतिकमिति न किंचिदेतत्। पदविश्रामप्रवृत्त्यादिकमुक्तं तद
पि न। तथा सति मण्यभावस्य शक्त्यंतरहेतुता न स्यात्। वस्तुतस्त्वनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वं त
च्चाभावस्याभावस्यापि संभवति। न च वृत्तित्वं सत्त्वं न चाभावे सत्त्वं निवृत्तं। न सत्त्वेह जातिः स्वरूपसत्त्वं वा। आद्ये ब्राह्मण
त्वादिजातेः सत्त्वाभ्युपगमनया स्वप्रत्यक्षाघहेतुतापत्तेः। न द्वितीयः स्वरूपसत्ताविरहासिद्धेः। अन्यथा घटो ना
स्तीति प्रतीतिर्न स्यात्। न च शशशृंगादिवत्प्रतीयत इति वाच्यं। दृष्टांतासिद्धेः। तथाहि असतः प्रमाणमप्र
माणं वा प्रत्यायकं। नाद्यः। प्रमितिविषयत्वेऽसत्त्वव्याघातात्। किं न तावत्प्रत्यक्षानुमानाभ्यामसत्प्रत्ययः। इंद्रि
यसन्निकर्षव्याप्त्यादिनिरूपकत्वस्यासत्यायोगात्। नापि शब्दस्तथा। असति शक्तेरयोगात्। शक्त्यभावेन मू
लकत्वलक्षणयाप्यसंभवात्। न च शक्तिलक्षणाभ्यां विनान्यः शब्दस्य बोधजनने कश्चिदुपायः। न द्वितीयः
असतः संबंधानिरूपकत्वाभावे अप्रमाणस्यापि बोधजनकत्वायोगात्। वस्तुतस्तु क्वचित्प्रमितं क्वचिदारोप्यत
इति वस्तुजातिरसतश्च प्रतीयत्वाभावे कथं तद्भ्रमोपि सुलभः। एतेनासंतान्यविज्ञानमर्थे शब्दः करोतीत्यादि

दित्यंडनोक्तिरपिखंडितेति। किंचैतदप्ययुक्तं। उत्तेजकाभावविशिष्टमण्यभावस्यहेतुत्वाभ्युपगमात्‌। येनरूपे
ण प्रतिबंधकाभावः कारणं तद्रूपानिरूपणमन्यत्रावसेयं। तथाच शक्तिसाधकानुमानेप्रयोजकत्वादिकं दूषण
मित्यभिप्रेत्याह॥ तेनैवेति। प्रतिबंधकाभावेनैवेत्यर्थः। नन्वादिति। दंडसंबंधपुरुषसंबंधेत्यर्थः। ननु दंडपुरुष
संयोगस्तथा सति प्रत्येकमपीत्यग्रिमग्रंथासंगत्यापत्तेः प्रत्येकमिति। केवलदंडवतिवनादौ केवलपुरुषव
ति सदनादौ दंडसंबंधवत्त्वालोकादौ पुरुषसंबंधवतिवसंतादावित्यर्थः। मिलकस्य समूहस्य। सएवेति। अ
लोकमित्यादिनागृहीत इत्यर्थः। ननु दंडसंबद्धपुरुषालंबनत्वाविशिष्टी कुर्मः नचात्र अगमिहितदोष इत्यत्राप
रितोषाद। अतिरिक्तवैशिष्ट्यानंगीकारे विशिष्टज्ञानसमूहालंबनयोर्भेदोनस्यादित्याह। दंडेति। विषयभे
दव्याप्तमेवहि धियां वैचित्र्यं विषयैक्ये चतन्नस्यादिति भावः। समूहालंबनाद्विशेषं वक्तुमाद्रयथाय
मिति। विशेषमेवस्पष्टयति इदमिति। नमिति। वैशिष्ट्यरूपविषयमादायापीत्यर्थ ... भावप्रेच
विशदयति। दंडीत्यत्रेति। प्राधान्येनेत्यत्रविशेष्यत्वादिति हेतुर्बोध्यः ... वंधरति। विशेष ... शेष्यान्य
त्वादित्याशयः। प्रत्येकसंबंधपक्षातिप्रसंगभंगाय संबंधपदार्थं विवेचयति अन्तरेति। अहंज्ञानवा

नित्यत्रविषयताया वैशिष्ट्यस्वरूपत्वमपाकर्तुं पदद्वयमुक्तं। वायुनिष्ठ... समवाय प्रत्या... दृष्यदंते
ष्ट्यात्मकत्वमपाकर्तुं यन्निरूपितेत्युक्तं। रजतनिरूपितसमवायस्य मुक्तिरजतवैशिष्ट्यो... त्वमपाक
वे र्तुं यन्निष्ठेति। नचैतन्नुरणरूपस्यनुरागादिस्मरणाभिव्यपदर्शवैशेषिकनाभिमानं वहन्नेव शोधिका
भिमानं नैवै ... अजानानेत्यत आह इदंदेवेति उपादानमित्यनेन संबंध। वैशिष्ट्यस्य पदार्थांतरवा
दिमीमांसकमतनिरासायेत्यर्थः। समानतंत्रेनाप्यशास्त्रे। अत्यंतपदेनेनरमत निराकरणारमसवश्य
तया वित्रात्त्विदेपलक्षणमनो वित्तं सूचयति। अन्येतिरिति दंडवानां वनवाससमये क्रीडां शंकुर्वन्दु
र्योधनो निवातकवचस्कंधबैर्नागपाशैर्बद्धानेतुमारब्धेस्तत्र दुर्योधनेन युधिष्ठिरं प्रतिमानेनर्पितं
त्वमितो मावयेत्यर्केधर्मेण भीमेन्नाहरा। एते सती भीमसेनो धर्म प्रतियदस्मानिरतुष्टेयं गंधर्वेस
दनुष्ठितमित्युविवर्हितनतो धर्मस्त्वहिंस महान्येः सहविरोधेतु वयं पंचोत्तरंशतं। परस्परविरोधेतु वयं
पंचवतेशतमिति भारतीयां कथा। निदर्शनीकृत्य दृष्टांतीकृत्य तंन्यायसिद्धांतं सेनेतिवैशिष्ट्यमित्यर्थः। वि
नायमतीयनया व्याख्यानेबीजमाह अत इति। द्विवचनमित्यूपलक्षणमपसिद्धांतश्चेत्यपिद्रष्टव्यं। आत्म

स॰प॰टी

धर्मेणेति। ज्ञानस्य घटाद्यवृत्तित्वे हेतुः सोऽयमवधारणगर्भेणेत्यनेन सञ्चयत्वात्मधर्मेण व्यभिचार इति भे
यं। घटविषयज्ञानानंतरं ज्ञातो घट इत्याकारव्यवहारः स घटज्ञानसंबंधनियमो वितया शंकायां आह संबं
धादिति। घटादेश्चेन्न तत्तापत्त्या घटेन ज्ञानस्य समवायः अद्रव्यत्वादेव न संयोगः विषयविषयिस्वरूपयोस्त २९
संबंधत्वं व्याहतमेव भिन्नाभया। अनेकत्वाभावादिति भावः। अन्ये त्वाहुरतिप्रसंगादिति। घटज्ञानानंतरं
पटादिरपि ज्ञातो घट इति वक्तव्यो ज्ञात इत्यादिव्यवहारस्स्यादित्यर्थः। नन्वेवं ज्ञानविषयतानियमाय
ज्ञाततावादिना विषयतानियमाय दृष्टता। व्यामपि पदार्थान्तरं स्यादत आह इष्टे इत्यादीति। स्वेति। इच्छा
विषयेत्यर्थः। इदं च न्यायमतेन समानविषयत्वेन ज्ञानेच्छादीनां कार्यकारणभावात् ननु परमतेनैते
समानप्रकारकत्वेन तेषां कार्यकारणभावात् सामान्यलक्षणानभ्युपगमात् अतस्वासिद्धपाकमे
चरपाकत्वप्रकारकज्ञानादनागतपाकजो गौरवेऽनितिनमतं तत्त्वचिंतामणावुपपादितं परं च मतेः इच्छा
विषयता नियमाद्दृष्टता स्यादेव। न च स्वजनकज्ञानप्रकाराश्रयत्वमेव तन्नियामकमिति वाच्यं तथा स
ति शुक्तौ रजतत्वप्रकारके ज्ञाने स्यात्। न च तादृशेदंत्वाश्रयत्वात्तदुपपत्तिः तथा सति दंडत्वं नरीपरज

२.

ते पि तदापत्तेरिति दिक्। ज्ञातता साधिकामर्थापत्तिमुपसंहरति अनइति। अनवस्थानादिति। यद्यपि वि
विद्वत्कस्वत एव विलक्षणज्ञातिन्यायेन जातिवदेव परनिर्वाहकत्वात्। ज्ञाततापत्तिरिति नानानवस्थान
थाप्यनुगतमत्या जातिसिद्धौऽनवस्थादिपरिहारार्थं तया यादृशस्वतः प्रयुक्ते इह तु ज्ञातता स एव न
मानं विषयतान्यथानुपपत्तेर्ज्ञानस्वभावत एव निरासात्। अत एवाह स्वभावसंबंधेनेत्यादि। स्वभावस्यैव
नियामकत्वं ज्ञाततावादिनाप्यभ्युपगंतव्यं। अन्यथा घटज्ञानेन पटे ज्ञातता कुतो न जन्येत। अपि च यदि ज्ञान
तया ज्ञानविषयतानियमस्तदानीं तद्घटादौ घटे दोज्ञानविषयता न स्यात्। ज्ञानना समवायिकारणविषयासत्त्वे ज्ञा
नेन ज्ञातताजननानुपपत्तेः न च तत्राप्युद्घटत्वादिनित्यपदार्थनिष्ठैव ज्ञातता तया च घटे विषयज्ञातता सिद्धे
रिति वाच्यं अतिप्रसंगात्। न च ज्ञातता समवायित्वेनिति वाच्यं सिद्धे कारणधारत्वेन तन्नं तद्व्यवहार इति वा
च्यं। तथा सति सन्निकृष्टवस्तुन्यपि ज्ञातत्वव्यवहारापत्तेः। न च ज्ञातता समवायिकारणसमवायित्वं तथेति
वाच्यं। स घटत्वसमवायस्य घटांतरेपि विद्यमानतयाऽतिप्रसंगतादवस्थ्यात्। किंच ज्ञाततामात्रं न विषयता
नियामकं जगदाधारकालस्य सर्वज्ञानविषयतापत्तेः। अत एव न ज्ञातता समवायवत्त्वमपि। न च ज्ञातता सम

स्प टी॰ वायिकारणत्वं तथेतिवाच्यं। द्रव्यस्यैव समवायिकारणत्वात् गुणादेर्ज्ञानविषयतानस्यादित्यनुपपत्तिरभिधर्मिण्ये
व विप्रतिपत्तिरिति किंतु तस्मान्यायादर इति द्वयं किन विदिति। प्रमेयत्वादिनेत्यर्थः। नतावद्द्रव्यादित्रिकं गुणादिवृत्ति
त्वात्· एतद्रूपादिसदृशं तद्रूपादीति प्रतीतेः। नापि सामान्यादित्रिकं· एकमणिध्वंससदृशो मणिरपध्वंस इति· प्र ४०
तीतेरभाववृत्तित्वात्· प्रतियोग्यनिरूप्यत्वादभाववृत्तित्वाच्च नाभावात्मकमपि नदित्याशयेनाह नसमंप्रतीतभूतिमि
ति॥ ननु सामान्यादिवृत्तेः सादृश्यस्य कथं सामान्यात्मकत्वमत आह तथा वेति। प्रमेयत्वं परंपरासंबंधं भूमोत्व
मव भावाभावसाधारणं सादृश्यं एवमभिधेयत्वं परंपरासंबंध मिथ्यात्वमेव· एवमन्यदपि सादृश्यमूह्यं। अत्र
केचित्। परंपरासंबद्धा जातिरेव यदि सादृश्यं तदा भावत्वं का जातिः· न च नत्रर्थानुल्लिखितधीविषयत्वरूप
भावत्वोपाधिप्रविष्टं धीत्वमेव तदिति वाच्यं। भावमात्रसादृश्यत्वानुपपत्तेः· ज्ञेयत्वाघटविशेषप्रसंगाच्च· किं
च यदि परंपरासंबद्धा जातिरेव सादृश्यं तदा सत्त्वं द्रव्यादीनां त्रयाणां सादृश्यं न स्यात्· तस्य तत्र समवा
यादिपरंपरायाः अप्येकरूपाया अभावान्न तथात्वं तथाहि· दंडित्वसादृश्यस्थले दंड
घेनैव सत्त्वात्· अपि च गुणत्वादिसादृश्ये गुणत्वेन सह समवेतसमवायः दंडित्वसादृश्ये तु दंडत्वेन
त्वे सहसंयुक्तसमवायः

खंड ६

सहसंयुक्तसमवाय इत्यादि· तस्मादुपाधिरूपं सामान्यं परंपरासंबद्धजातिरेवेति न प्रामाणिकं किंतु जात्यैव दु
पाधिरूपमपि सामान्यं जातिभिन्नमेव· इयान्परं विशेषः समवेता जातिः स्वरूपसंबद्ध उपाधिरिति। तदेवं पदार्था
दिक्रियापत्तिः सामान्यांतर्भावस्वीकारात्· वदंति च सामान्यं द्विविधं जातिरूपमुपाधिरूपं चेति। तत्रोपाधि
रूपं सामान्यं असति बाधके सखंडं क्वचिदखंडमपि बाधकवशात् स्वीक्रियते यथा भावत्वादिकं। घटत्वादिकमपि
न जात्यपलापस्तथाग्रे विवेचयिष्यते। तथा च तद्भिन्नत्वे सति तद्गतासाधारणभूयोधर्मवत्त्वरूपं सखंडं सामा
न्यमेव सादृश्यं अत्र चंद्र इव सादृश्यमपाकर्तुं तद्भिन्नत्वे सतीति। गजगर्दभयोः सादृश्यमपाकर्तुं भूयोधर्मवत्त्व
मित्युक्तं· प्रमेयत्वादिभिः सर्वत्र सर्वसादृश्यमपाकर्तुमसाधारणेति। यत्किंचिदसाधारणधर्मस्य सर्वसाधार
णत्वात्सर्वत्र सर्वसादृश्यमपाकर्तुं भूय इति वदंति। तच्चिंत्यं। तदसाधारणधर्मस्यान्यत्रावृत्त्ययोगात्· अ
न्यत्रवृत्तित्वे च साधारणत्वायोगात्· न चासाधारणपदं व्यतिरेकिधर्मपरमिति वाच्यं· तथा सत्यपि
कमलमुखादीनां सादृश्यानुपपत्तेः कमलनिष्ठसौरभस्य कामिनीमुखावृत्तित्वात्· गंधादीनाम
व्यासज्यवृत्तित्वात्· गजगर्दभयोरपि रूपवत्त्वादिना सादृश्यस्येष्यमाणत्वात् तदंतत्वापि व्यर्थमेव·

वैधर्म्य१

अतएव साधर्म्यं वैधर्म्ये पृथिव्यप्तेजसां रूपवत्वं पृथिव्यप्तेजोवायुमनसां क्रियावत्वं सामान्यमिति तथात्मपा
दो क्रियाविसंगच्छते। एवमपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानीति भाष्यालोचनया सर्वत्र सर्वं ह
रूपस्यैवमाणत्वादसाधारणपदमप्ययुक्तमेव तस्माद्धर्मिणि यस्मिन्यदवच्छिन्नो यो धर्मः स तेन धर्मिणा तत्स
दृशः अभावो विशेष्यत्वादिना भावशब्दार्थ एवेति रहस्यमिति दिक्॥ ॥अनन्यथासिद्धेति। नन्वनन्यथा
सिद्धपतनहेतुतया गुरुत्ववदनन्यथासिद्धोन्नमनहेतुतया लघुत्वमपि गुणान्तरं स्यादेव तुलादौ ल
घुत्वोत्कर्षेणोन्नमनोत्कर्षदर्शनात्। न च प्रतिबंधकगुरुत्वाभावादेवोन्नमनोपपत्तौ कानन्यथासिद्ध
त्वमिति वाच्यं। उन्नमनहेतुलाघवरूपप्रतिबंधकाभावादेव पतनोपपत्तौ तत्राप्यन्यथासिद्धेस्तुल्य
त्वात्। यदि च भावकार्यस्यासमवायिकारणजन्यत्वात् पतनासमवायिकारणतया गुरुत्वं सिद्धं तदो
न्नमनासमवायिकारणतया लघुत्वसिद्धिरप्यविकल्पा। अत एवाचिन्त्यो हि तेजसो लाघवातिशयेन वेगाति
शयवृत्त्यादिकिरणावलीग्रन्थो विसंगच्छते अन्यथा जातिरूपातिशयस्य कथं लाघवेऽपि निरस्तस्य लघुत्वम
पि गुण एवेति चेत्। अत्रोच्यते गुरुद्रव्येण सह संयुक्तसंयोगादेरेवोन्नमनसमवायिकारणत्वमिति नान्यथा

सिद्धिः। लाघवातिशय इत्यत्रापि यावत्प्रतिबंधकाभावसंवलनस्यातिशयपदार्थत्वेन व्याख्यातुमभि
र्व्याख्यानादुपपत्तिरिति वदंति। अन्यपदार्थप्रसक्तेरेवाभावादत्यन्तस्यापीत्यादेर्वैयर्थ्यमाशंक्याह संकिष्यमा
णेति। अन्यपदस्य संबंधिसाकांक्षत्वात्तमाह ज्ञेय इति। इवशब्देन न्यूनत्वमप्यदूषणं सूचयति॥ ननु सम
भिव्याहृतपदार्थतावच्छेदकव्यापकत्वमेवकारार्थ इति प्रागुक्तेन विरोधः। आकाशादिपरिमाणादिषु
नित्यत्वसत्त्वे विकारणत्वाभावात्- न चाकाशपरिमाणमपि परिमाणत्वसामान्यलक्षणप्रत्यासत्त्या भू
यपरिमाणवदित्येवमाकारकालौकिकप्रत्यक्षजनकं भवत्येवेति एवं साधर्म्यवैधर्म्यभाष्यीयाकारता
स्वग्रंथव्याख्यानावसरे इदं वक्ष्याम इति धर्मान्तरकार्यापेक्षयेति व्याख्यातेऽनाप्तौ इति वाच्यं। तत्रापि परंपरा
संबद्धं परिमाणत्वमेव प्रत्यासत्तिर्न तु परिमाणं तस्य प्रत्येकमात्रपर्यवसिततया सामान्यत्वाभावात्। वस्तुतस्तु
त्वक्सामान्यज्ञानमेव प्रत्यासत्तिर्न तु सामान्यं अतीतानागतधर्मस्य प्रत्यासत्तित्वापत्तेः। न च सामान्यस्य नि
त्यतया कथमतीतानागतत्वं तस्येति वाच्यं। न हि सामान्यं प्रत्यासत्तिरिति स्वस्य जातिरित्यर्थः किं त्वनेकव्यक्ति
धर्मित्वं तच्च बकुत्वादिसाधारणमिति तद्ज्ञानमेव प्रत्यासत्तिः। न चैवं ज्ञानप्रत्यासत्त्यभेदापत्तौ गतमतौ

किकश्चत्या सन्निवेशे विधेयेनेति वाच्यं· समानासमानविषयत्वे नोभयोर्भेदात्· तथा च कथमयमेवकारः संगच्छत
इत्यत आह एवकारेणेति· तथा चाव्ययानामनेकार्थत्वाद्विरोधिव्यवच्छेदपूर्वकमेवैवकारार्थः नचोक्तार्थे एवकारा
प्रयोगः पूर्वापर्यायीणामिति वाच्यं· तत्त्वज्ञानमेतदुपायमाकर्णयंतीत्यादिबोद्धारं प्रकारप्रथमफक्किका व्याख्या
नावसरेऽयमेवकारस्तत्त्वज्ञानविरोधितं मिथ्याज्ञानादिकं व्यवच्छिनत्ति निवर्द्धमानोपाध्यायैरुक्तं आत्मादे
रविनाशापायतयान्यव्यवच्छेदस्य वक्तुमशक्यत्वादिति भावः। अन्ययोगव्यवच्छेद एवात्र कुतो नैवकारार्थः सदा
रविनाशापायतयान्ययोगस्य व्यवच्छेदात्तेन कश्चिद् विशेषदर्शनं। नन्वेतस्यायमेवकारस्य विरोधिव्यवच्छेदक
न्यस्ययोगोऽन्यस्मिन्नायोगस्तद्व्यवच्छेदस्तेन कश्चिद् विशेषदन्यच्च। नन्वेतस्यायमेवकारस्य विरोधिव्यवच्छेदक
त्वे सर्वत्रैवैवकारार्थ इति न्यायात्किं विरोधस्यादरवस्थ एवेत्यत आह वस्तुतस्तु इत्येति। चतुर्थमिति। किं च पुरु
षार्थे तत्साधनबहिर्भूततद्विषयोपदेशेनेत्यादिना कृतमित्यर्थः। आत्मा वा अरे द्रष्टव्य इत्यादिश्रुत्या आ
त्मतत्त्वज्ञानस्यनोऽसहेतुत्वेऽपि कथमितरतत्त्वज्ञानस्य हेतुतेत्याशंक्याह निःश्रेयसेति। पृथिव्यादितत्त्वज्ञाना
नंतरमात्मतत्त्वज्ञाने सत्येव तादृशयादुभयप्रागभावयोरपि निःश्रेयसप्रागभावव्याप्यत्वमित्याशयः। पदार्थसा
क्षात्परंपरासाधारणं हेतुत्वं विवक्षितेनेत्यत· वीजमाह एतेनेति स्वाज्ञानमात्मा मिथ्याज्ञानं परमिति वा व्यालंकार

:। कृतमिति। पुरुषार्थहेतुत्वाभावादिति भावः। आधेयधर्महेतवइत्याधारं मत्वैवकिरत्यर्थः। अनारोपितमित्यत्र न आरोपे
इतमिति प्रसज्यप्रतिषेधपक्षे आरोपाविषयत्वमर्थः सर्वत्र संभवतीत्याह भ्रमेत्यादि। नच यत्र विशेषदर्शनं तत्रैवा
रोपविषयत्वस्याभावात्कथं केवलान्वयित्वमिति वाच्यं· पुरुषांतरीयारोपविषयत्वस्य तत्र आहार्यारोपविषयत्वस्य
वा सर्वत्र सत्त्वात्· नञ् आरोपः अनारोपः प्रमा तामितं विषयः प्रमाविषय इति पर्युदासे फलितार्थः सा च न संभवत्य
ति प्रसंगादित्याह क्वचिदिति। रजतप्रमाविषयो रजतत्वं शुक्तावपि तत्त्वं स्यादित्यर्थः। ननु तत्र क्वचित्प्रसिद्धं रजतत्व
स्यारोपविषयत्वं कथं तत्त्वं तत्स्यादत आह आरोपेत्यादि। पर्युदासमाश्रित्य बाधाहारिणा पूर्वदोषनिवारणा
र्थं व्याकृष्टं तथापीति। अनारोपितं· प्रमाविषय इत्यर्थः। प्रमा शरीरप्रविष्टं वैशिष्ट्यमात्रे णैव लक्षणोपयत्नो रत
र वैयर्थ्यं मनसि निधायाह त्रस्ती ति। ननु यत्र यत्प्रमाविषयस्तत्र तत्त्वमिति संमुखमेवार्थातं नहि घट इ
ति वक्तव्योऽनघट इति विज्ञं सावदंतीत्यत आह पर्युदासेनेति। तदिति। प्रमाविषयत्वसामर्थ्येनेत्यर्थः। व्यति
रेकितयेति स्वरूपटनीयापरीक्षिरमाभिरामे परामेण सनाथावयमित्यादौ पथ्यातेनव्यतिरेकित्वे सति यत्र विशे
ष्यपदसित्तत्र तत्त्वं। अयमाशयः। आरोपविषयः सप्रपंचो व्यतिरेकव्यतियोगिकेवलान्वयित्वे सर्वत्र विद्यमान

तयातदभाववत्वघटितारोपायोगात्· स्ववृत्तिनियामकसंबंधावच्छिन्नाभावप्रतियोगितात्वंच व्यतिरेकित्वंनवे
तत्वमयत्वादौ स्वरूपसंबंधेन सर्वत्र तत्सत्वादिति न तु पर्युदासवत्स्थले नञ्स्वसमभिव्याहृतसदृशंबोद्ध
व्यमुपस्थापयति ननु यत्किंचित्सदृशमतिप्रसंगान्नदिति चेन्न तादात्म्यारोपान्वयित्वात्· ज्ञानत्वादिनाऽरोपसदृशा
प्रसिद्ध्यस्थायितां आरोपविषयसादृश्यपलाभस्तत्कथमितिचेन्न।। मैवं।। आरोपितसमभिव्याहृतस्यपर्युदास ४३
नेत्राऽङ्गीकारात्· तेन नारोपितो भ्रमविषयोन· भ्रमविषयार्थतिरिक्ततत्सदृशादृत्यर्थभावाः। नचैवं क्रियान्व
यित्वात्प्रसज्यप्रतिषेधते वस्यान्नपर्युदासत्वेतिवाच्यं· क्रियान्वयानन्वयोरप्रयोजकत्वात्· अन्यथा भूतले
घटो नेत्यादौ प्रसज्यप्रतिषेधतानस्यात्· क्रियान्वयाभावात्· किंतु निषेधकोनञ् प्रसज्यप्रतिषेधस्त
द्भिन्नः पर्युदास इत्याद्यन्यत्र विस्तरः। पर्युदासेनारोपितनिरूपितव्यतिरेकित्वलक्षणसादृश्योपस्थिति
रुपायमाहनञिवेति। नञिवयुक्तमन्यसदृशे तथाह्यर्थगतिरिति हि शाब्दिकन्यायः तस्यायमर्थः। नञ्
युक्तं इवशब्दयुक्तं नञर्थी चनचतंनञादिसमभिव्याहृतान्यत्किंस्वतत्सदृशे प्रवर्त्ततेयथा अब्राह्मणप
दात्· अब्राह्मणमानयेत्यब्राह्मणसदृशः क्षत्रीयएवप्रतीयते तत्रैवाभिवापुत्रं व्यवहारान्नतु घटादिः
दा

यथा चंद्रवन्मुखमित्यादौ चंद्राभिन्नं चंद्रसदृशंमुखमिति प्रतीयते इत्यतः अर्थस्याविर्ज्ञानं तथा तेनैव प्र
कारेणानयैवानुभवादिति। अतएवाहुः पर्युदासः सदृग्ग्राही यत्रोत्तरपदेन नञ्· प्रसज्यप्रतिषेधोयं क्रि
यया सह यत्र नञ् इति। व्यतिरेकित्वरूपसादृश्यविशेषग्रहणाभक्तैतात्पर्यवशात् यथा घटमानयेति· सामा
न्यप्रयोगे देवदत्तीयघटविशेषोपस्थितिरिति वहवः। वस्तुतस्तु व्यतिरेकित्वप्रकारकबोधे लक्षण
यैवेतिध्येयं। ननु लक्षणादिक्लेशकल्पनया व्यतिरेकित्वकल्पतमयुक्तमत आह तेनेति। परस्परव्या
वृत्तिगोचरपदार्थतत्वज्ञानजनकं यत्ज्ञानं व्याप्तिपक्षधर्मताविषयकलिंगज्ञानं तद्विषयीभूतं यत्त
त्वं व्यतिरेकेण न हि केवलान्वयिनाऽन्तरभेदानुमितिस्तस्य स्ववृत्तिनियामकसंबंधावच्छिन्नव्यतिरे
काप्रतियोगितया व्यतिरेकव्याप्त्यभावादिति लक्षणत्वं केवलान्वयिधर्मस्येतिभावः। अतिव्याप्तिरिति।
तस्य सर्वत्र विद्यमानतयातिव्याप्तिप्रसंगादित्यर्थः निरस्तमिति। तस्य विवक्षितव्यतिरेकित्वाभावा
दिति भावः। श्यामत्व इति। तस्य ज्ञानकालेऽवर्त्तमानत्वादित्यर्थः। तत्वमिति। पूर्वमित्र अस्य वर्त्तमा
नत्वादित्यर्थः। पाकरक्तेऽश्यामत्वं स्यादिति घटे आपादानपाकविशिष्टेवा। आद्य इष्टापत्तिरित्याह घटे
त्वे

स.प.टी

ति। द्वितीये आह पाकजेति। पाकजरागविशिष्टे पाकजरागरूपविशेषणावच्छिन्नेतदवच्छेदेनेति यावत्
। तथा च यदवच्छेदेन यत्र विशेषणं यस्य यः संबंधस्तदवच्छेदेन तत्संबंधेन तत्र तन्नास्तीत्यर्थः तेन विशिष्टस्या
पदार्थांतरतया विशिष्टे तत्संबंधाभावादित्युक्तमित्यपास्तं। अत्र संयुक्तसमवायेन पुरुषत्वस्य दंडत्वस्य
समवायेनापि तत्र त्वत्त्रं निवारयितुं यत्तत्संबंधविवक्षा। मूलावच्छेदेन वृक्षे संयोगस्याग्रावच्छेदेनं तत्त्वतां ४४
निवारयितुमवच्छेदकविवक्षेति ध्येयं। वैशेषिकनये शाब्दप्रमानमभ्युपगमात्। श्रवणादिकं विवेचयति श्रु
तिपदेति। द्वासुपर्णेत्यादिपदानि स्वस्वार्थानामपि संसर्गज्ञानपूर्वकाणि। आकांक्षा योग्यता सन्निमत्पद
कदंबकत्वादित्याद्विनेत्यर्थः। तादितराः श्रवणेतरस्यर्थः। षट्पदार्थीगोचरश्रवणादीनां चतुर्णां समुच्चित्य
मोक्षोपयोजकत्वं प्रत्येकं वा आद्ये अनंतपदार्थगोचराणां तेषां ब्रह्मणापि संपादयितुमशक्यतया मोक्ष
स्यासाध्यत्वेनापुरुषार्थत्वापत्तिः अंत्ये श्रवणमात्राद्यत्किंचित्पदार्थगोचरश्रवणमात्राद्वा मोक्षापत्ते
रित्याशंकां विवेचयति एतच्चेत्यादिना। यथासंभवमित्यनेन प्राप्तसर्वज्ञानयौगपद्यं निराकरोति तत्रा
त्मनः इति। अप्रसिद्धिमिति। असंभवमित्यर्थः स्वावच्छिन्नेति। देहावच्छेदेन यो भोगस्तज्जनकादृष्ट

४५

क्षयपेत्यर्थः। अप्रसिद्धिमिति।। प्रसिद्धिर्निश्चयस्तदभावोऽप्रसिद्धिरनिश्चयो मोक्षानिश्चयः इति यावत्।
तथा च मुक्तामुक्तत्वादिव्यवहारो न स्यात् प्रमाणाभावेन व्यवहर्तृव्यवहाराभावादित्यर्थः। तादृतीति। तथा च
संसारवृक्षशालामूलस्य मिथ्याज्ञाननाशान्तरदेहाद्यभावः सुनिश्चय इति भावः। यद्यपि मिथ्याज्ञानकार्यस्य
स्तदुःखाभावमोक्षपदार्थत्वेन कश्चिद्दोषस्तथापि मिथ्याज्ञानकारणत्वादिमूलपर्यालोचनेन लक्षणपर
तया व्याख्यावष्टेतेनेति। इदं च स्वावच्छिन्नेत्यादिग्रंथमारभ्य दुःखपरिहरत्वादित्यंतमूलग्रंथव्याख्यानमिति वि
षद्येतया लिखनं वस्तुगतिमनुरुध्य न तु लक्षणांतर्गततया स्ववृत्तिकार्यसमस्तदुःखध्वंसस्येतल्लक्षणत्वेदो
षाभावादिति रहस्यं। सौषुप्तिकेति। अत्र दुःखपदेन यथाकरं गौणमुख्यभेदभिन्नदुःखं विवक्षितं तत्त्वाकरोप
त्वया मुख्यमेव विवक्षितं आद्यशरीरेंद्रियादेः सुषुप्तौ सत्त्वात्कथं तत्र सकलदुःखाभावः अंत्ये श्रोत्रमनः प्रभृते
रिति प्राचीनग्रंथविरोधः नवतदा शरीरेंद्रियादेः सत्त्वेपि दुःखादिकार्यजनकत्वेनास्य कल्पनया तदभावादि
भिधानमिति वाच्यं। स्वावच्छिन्नभोगजनकादृष्टध्वंसपेत्यादि पूर्वोक्तविरोधपत्ते रिति वाच्यं। चित्यं। अधिकरणेति।
तथा च मिथ्याज्ञानध्वंससमानकालीनेत्यर्थः नच सौषुप्तिकसकलदुःखाभावतथेति नातिप्रसंगः इति भावः।

तस्यापीति। सौषुप्तिकसकलदुःखाभावस्येत्यर्थः। व्यधिकरणेति। परिदृश्यमानास्मदादिसंसारानुपपत्तेरिति भा
वः। ननु कारणपदमकारणं व्यावर्त्तयतु नाम सामर्थ्यात् अनुकारणमपि त्रिश्वस्मदादिमिथ्याज्ञानीनामधिकारणता
याकथं तदवच्छेदकत्वं तत्राह सोऽस्माभिमतेति। अनेन न च कारणपदेन सामानाधिकरण्यलक्षणोपायं तद्दी
जं संबंधो दर्शितः। तदिति। सामानाधिकरण्यलक्षणायेत्यर्थः। न पूर्वेति। सौषुप्तिकसकलदुःखाभावेऽति
व्याप्तिः शुकमुक्तावव्याप्तिर्वीनेत्यर्थः। एवं मिथ्याज्ञानप्रध्वंससामस्त्यविवक्षायां उत्तरं। दुःखाभावविशेषणं
पत्समस्तमिति पदं तदित्यर्थः। अयमाशयः। तद्धि इदानींन कतिपयदुःखध्वंसनिवृत्तौ वाच्यं न द्वारणं
वसमस्तमिथ्याज्ञानप्रध्वंससमानाधिकरणतया तस्य मिथ्याज्ञानप्रध्वंससमानाधिकरणपदेनैव व्यावर्त
मिति तद्वैयर्थ्यमिति। तादृशीति। समस्तमिथ्याज्ञानप्रध्वंससमानाधिकरणे इत्यर्थः। चरमदुःखेन समस्तमि
थ्याज्ञानध्वंसस्य राशिन्यायेन वृत्तत्वादिति भावः। अन्यथा दुःखाभावे समस्तविशेषणानुपादाने दुःखपदं मुख्य
दुःखपरं मत्वाशंकते सुखेनेति। नवतत्र मानाभावः। तेनराः सुखमत्यवद् इति श्रुतेरेवमानत्वात्। तदापीति।
अन्यथा भोगानुपपत्तेरिति भावः। किमितिहिलक्षणेक्यसूलक्षात्मनाया वैसेन किमिति संबंधः। कथमि

ति। ननावद्भूतमिथ्याज्ञानस्य ध्वंसस्य त्वज्ञानसाध्यः तस्यभूतत्वात् ध्वंसस्य च प्रतियोगिजन्यत्वात्। नापि
वर्त्तमानस्य तथा विरोधिगुणांतरोपनिपातेनान्यथासिद्धेः। नाथनागतस्य नाशस्तथा प्राक्तनयो रविता
स्यापिस्वकार्यदुःखेनैवताशोपपत्तेरित्याशयः। वासनासंस्कारः। मूलेमिथ्याज्ञानस्य कंठरवेणैवाभिधा र
नात् ग्रंथविरोध इत्यर्थः। यद्यपि मिथ्याज्ञाये तनैवाधिकरणं वृत्त्या वासनापि मिथ्याज्ञानपदाल्लभ्यते
तथापि नूठिमाश्रित्यैतदुक्तमिति ध्येयं। आध्यं विवार्थस्वरूपं यस्मा सलक्षणस्य तादृशलय इत्यर्थः कस्तु
नमामहड्डाडविशेषः। प्रसिद्धेरिति। शुक्तितत्वज्ञानेन तन्मिथ्याज्ञाननाशस्यानुभवसाक्षिकत्वादिति भावः
तस्य मिथ्याज्ञानस्यातत्वमिथ्याज्ञानमित्यर्थः॥ श्री॥ ॥ इत्युद्देशप्रकरणं॥ ॥ यं निवेधमुखेनाहन
चाठेवपतिं श्रुतिं तं वाममविलसत्वं परामनीरदमाश्रये। १५ ननु यथोद्देशं लक्षणं प्रायनमिति न्यायात्तदा
यद्दिशानंतरं तल्लक्षणमेव कर्त्तुमुचितं न तु लदभिधानप्रतिज्ञानं इदानीमिति वयर्थं व्यतद्धति वर्त्तमानार्थक
लटैवतदर्थलाभात्। तत्त्वज्ञानलक्षणयोरुपजीव्योपजीवकत्वकथनमपि व्यर्थमित्यतआह इहेति वर्त्तिष्यमा
णयोरिति। उद्देशलक्षणप्रकरणयोरित्यर्थः। इदानीमिति पदेनोद्देशलक्षणप्रकरणयोः कार्यकारणभाव

241

सु. प. दी

लक्षणसंगतिकथनानंतरं तद्वैयर्थ्यात्। तथाहि। इदानीमित्यत्र हि प्रकृते उद्देशानंतरमित्यर्थः तथा चानंतर्यनि
रूपकतयोद्देशस्यासिद्धत्वे लब्धे अव्यवहितवर्तमानार्थकलट्प्रत्ययेन लक्षणमभिधानस्य वर्त्तमानत्वमिति
विषयत्वबोधनादसिद्धत्वे च लक्ष्ये सिद्धे साध्यसमभिव्याहारे सिद्धं साध्ययोपयुज्यत इति चापास्तं। संगति
लाभ उद्देशानिरूपणेन यथार्थस्वरूपेक्षाया किमस्य लक्षणमिति लक्षणजिज्ञासायां लक्षणप्रणयनाल्लक्ष ४६
ण च करणापेक्षयोद्देशप्रकरणस्य पूर्ववृत्तित्वं युज्यत इति। आवश्यकत्वं दर्शयन्निरस्यते न लक्षणधी
नत्वादिनेन सार्थक्यमभिहितं तस्यायमाशयः तत्त्वज्ञानं नामेतरभेदसाक्षात्कारः सर्वेतरभेदानुमित्या
त्मकमननसाध्यः। अनुमितिश्चोद्देशजन्यपक्षज्ञानमात्रान्न भवितुमर्हति किंतु हेतुज्ञानादिकारण
कलापाद्धेतुश्च लक्षणमेवेति तदभिधानमावश्यकमिति। प्रकृताकरणं च शिष्यावधानायेति ध्येयं। तदि
ति लक्षणमभिधानमित्यर्थः। प्राणस्येति। आशितपीतरसाभ्यां तरगमकत्वं प्राणत्वमित्यर्थः। अन्नस्येति।
अन्यथा तदभिधानन्यूनतापत्तेरितिभावः। ननु प्राणलक्षणमनभिधानं लक्षणमेवेति। नत्विदानीमुद्देशो
विकसावितपदार्थस्येति उद्देशो व्यवच्छिद्यते॥ तत्त्वज्ञानस्योद्देशात्त्रितयाधीनतया परीक्षाया अप्यावश्य